॥ श्रीः ॥

श्रीवराहमिहिराचार्यविरचितं-

बृहज्जातकम्

दशाध्यायी (नौका) टीकोपेतम् ।

तदेव

जयपुरनिवासिराजकीयज्योतिर्वित्पण्डित

हनूमच्छर्मणः सकाशात्समुपलभ्य,

क्षेमराज-श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

(खेतवाडी ७ वीं गली खम्बाटा लैन)

"श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितम् ।

संवत् १९६९, शके १८३४.

प्रस्तावना ।

ज्यौतिषशास्त्रस्य फलितग्रन्थेषु बृहज्जातकनामाऽयं ग्रन्थः कीदृशो गम्भीराशयः कीदृशश्चोपकारक इति नाऽविदितं किल विचारशीलनिखिलज्योतिर्विदामिति विशेषपरिचयप्रदानश्रमाऽनवसरः । अनेनैकेनैव ग्रन्थेनाऽखिलजातकविषयविज्ञतामुपलभ्य त्रिकालदर्शिभूयमनुभवेयुर्गणकगणा इति मनसि निधाय श्रीवराहमिहिराचार्येण होराशास्त्रपयोधिनिर्मन्थनोद्धृतसारसद्रत्नानामस्मिन्ग्रन्थे कया युक्त्या निवेशः कृत इति न साधारणधियामवधारणविषयः । यद्यप्यनेकदैवज्ञदोषज्ञैरेतदाशयविशदीविधित्सया भाष्याणि टीकाश्च व्यरच्यन्त, परं पूर्णतयैतदाशयप्रकाशनयशोऽनुभवितुं न भाग्यभाक्त्वं तेषाम् । तत्र मधुसूदनी—भट्टोत्पलीभ्यां चावश्यमुपकृताः कृतिनो दैवज्ञा यावच्छक्यमतिदुरूहैतदर्थप्रकाशनसफलप्रयासेन । परमुक्तानार्थतोऽयमन्यो गूढाभिप्रायो ग्रन्थकर्त्तुरिति कथनगौरवं नानुभूतमाभ्यामपि ।

सन्तु चानेकशो धन्यवादास्तस्मा अविज्ञातनामधेयमहोदयाय, येन चैषा दशाध्यायी (नौका) नामधेया टीका निरमायि । यत्र च मूलाक्षरत एवाऽनेकेऽर्था ग्रन्थान्तरप्रमाणप्रदर्शनपुरस्सरं निस्सार्य प्रदर्शिताः । यथास्थलं विविधफल प्रश्नशकुन-योगाभ्यास-कलाकौशल-कामकेल्यादयोऽपिमूलाक्षरैरेव प्रकटिताः, यदनुसारतः फलकथनेन च ज्यौतिषशास्त्रगौरवं गणकगुणगरिमा च निखिलनराणां श्रद्धेयतामाप्नोति । दर्शनतो विद्वद्भिरेवेयं प्रशंसनीया भविष्यतीति विरम्यत एवैतत्कर्मणः ।

सा चैषा कुत्राप्यमुद्रितत्वाल्लुप्तप्राया मया चिरायाऽधिकश्रमत एकां प्रतिमतिप्राचीनां जीर्णां घुणाऽऽघूर्णनामुपलभ्याऽति कठिनतया संशोध्य क्षेमराज-श्रीकृष्णदासश्रेष्ठिने मुद्रणाय सर्वाधिकारसहिता सप्रेम समर्पिता । तेन च दशाध्यायीटीकासहितमेतद्बृहज्जातकं स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणयन्त्रालये सुव्यवस्थया शीशकोत्तमाक्षरैः पुष्टमसृणपत्रेषु मुद्रयित्वा प्रकाशितम् । अतोऽन्यः कश्चिदस्य मुद्रणादिसाहसं न कुर्य्यान्नोचेद्धानिरेव तस्य ।

यद्यप्यतीवसावधानतया शोधनमकारि, परमादर्शपुस्तकान्तराभावाद्यत्र कुत्राऽपूर्णता दृष्टा तत्रैवं .... बिन्दुविन्यासः कृतः । संशये प्रायः प्रश्नचिह्न (?) निधापनमपि । यदि केषामपि विदुषामन्तिक एतत्पुस्तकं चेत्तेऽवश्यमनुकम्पया प्रेषयेयुः पत्रद्वारा व्यवहरेयुर्वा, यतोऽन्यावृत्तावशेषशोधनतामनुव्रजेदिति । संप्रति चैतद्ग्रहणपठनपाठनाद्भुतफलकथनादिभिरनुगृह्णन्तु मामनुग्राहका ग्राहका विद्वांस इति भृशमभ्यर्थयते—

विद्वदनुकम्पाभिलाषी—

ज्योतिर्विद् पं॰ हनुमान् शर्मा,

(जयपुर सिटी.)

॥ श्रीः ॥

अथ दशाध्यायीटीकोपेतबृहज्जातक-विषयानुक्रमणिका।

इति कर्माजीवाध्यायः१०.

इति दशाध्यायी (नौका) टीकोपेतबृहज्जातकविषयानुक्रमणिका ।

॥ श्रीः ॥

अथ बृहज्जातकम्.

दशाध्यायीटीकोपेतम्

(शार्दूलविक्रीडितम्)

मूर्तित्वे परिकल्पितश्शशभृतो वर्त्माऽपुनर्जन्मना-
मात्मेत्यात्मविदां क्रतुश्च यजताम्भर्ताऽमरज्योतिषाम् ।
लोकानाम्प्रलयोद्भवस्थितिविभुश्चानेकधा यः श्रुतौ
वाचं नः स दधात्वनेककिरणस्त्रैलोक्यदीपो रविः ॥ १ ॥

जयति स भगवान्गजास्यो यत्कर्णव्यजनमारुता भजताम् ॥
यान्तो व्यसनानि हरन्त्यायान्तश्चार्पयन्त्यभीष्टानि ॥ १ ॥
सत्यज्ञानपरब्रह्मज्योतिरानन्दरूपिणीम् ॥
नौमि सर्वोत्तरोदात्तप्रश्नमालां सरस्वतीम ॥ २ ॥
सत्यज्ञानप्रदायेष्टदेशकालप्रबोधिने ॥
नमः श्रीगुरवे साक्षात्परमेश्वरमूर्तये ॥ ३ ॥
येषामात्मनि गर्भसंस्कृतिमुखैर्मौञ्जीनिबन्धान्तिमैः
पूतैः कर्मभिरत्र भाति विधिवद्ब्रह्म प्रतिष्ठापितम् ॥
श्रौतस्मार्तसमस्तकर्मसततानुष्ठाननिष्ठात्मन-
स्तानेतान्प्रणमामिं भूमिविबुधानिष्टार्थकल्पद्रुमान ॥ ४ ॥
श्रीसूर्यादीन्स्वसंवेद्यनिग्रहानुग्रहान्ग्रहान् ॥
जगत्सृष्टिस्थितिलयज्ञानहेतूनुपास्महे ॥ ५ ॥
ज्योतिःशास्त्रमिदं विधाय विपुलं त्रिस्कन्धभिन्नं पुरा
लोकानां मतिमान्द्यतः कलियुगे तत्पातभीत्या पुनः ॥
स्वल्पं तत्सकलं ततो रचितवानादित्यदासात्मजो
भूत्वा यो मिहिरो वराहमिहिरो नाम्ना नमस्कुर्महे ॥ ६ ॥

वराहहोराशास्त्रस्य विज्ञातोऽर्थोऽथ यो मया ॥
स तु शिष्यावबोधार्थं संक्षेपेण विलिख्यते ॥ ७ ॥
श्रीमद्वराहमिहिरहोरातात्पर्यसागरे ॥
सदर्थरत्नसंसिद्धयै टीका नौका विचार्यते ॥ ८ ॥

तत्र लोकानुग्रहार्थमतीतानागतवर्तमानकालविषयफलविशेषज्ञानोपायभूतं होराशास्त्रं चिकीर्षुः श्रीवराहमिहिराचार्यः प्रथमम्

"आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् ।"

इत्युक्तं शिष्टाचारमनुस्मरन्नभीप्सितस्याविघ्नपरिसमाप्तये समुचितेष्टदेवतामाशीर्मुखेन परामृशति-

मूर्तित्व इति ॥ तत्र सप्तविंशतिपदानि । स रविर्नो वाचं विदधात्विति क्रियाकारकसम्बन्धः । स यच्छब्दयुक्तवाक्यसप्तकोक्तगुणविशिष्टः । रविः "रु शब्दे" इत्यस्माद्धातोर्निष्पत्त्या शब्दब्रह्मस्वरूपस्त्रयीमयो भगवानादित्यो रविशब्देनोच्यते । "एतन्मण्डलं खे तपति दिनकृतः ऋचोऽर्चींषि सामानि" इत्यादिभिः सूर्यस्य त्रयीमयत्वम् । अत एव शब्दब्रह्मस्वरूपत्वं च प्रदर्शयता रविशब्देन निर्देशाद्भगवतः श्रीसूर्यदेवस्यादेशप्रधाने जातकशास्त्रे समुचितेष्टदेवतात्वं ध्वन्यते । नोऽस्मभ्यं वाचं प्रार्थ्यत्वेन विशिष्टां वाचमित्यर्थः । वाङ्मात्रस्याप्रार्थनीयत्वात् ।

वाचो वैशिष्ट्यं च यथाकालप्रतिभानम्, अप्रतिहतत्वम्, सत्यत्वं, श्रोत्रमनोहारित्वमित्यादिभिर्गुणैः संयोगः । तादृशीं वाचं दधातु । "डुधाञ् धारणपोषणयोः" इत्यस्मादाशिषि लोट् । दधातु ददातु सम्पादयत्वित्यर्थः । नैककिरण इति प्रसज्यप्रतिषेधे नञ् । तथा च भर्तृहरिः-

"प्रसज्यप्रतिषेधोऽसौ यत्रोत्तरपदेन नञ् ।" इति ।

एककिरणो नेति योजना । एकप्रकारमेकत्वं तस्मादनेकप्रकाराकिरणः । उष्णकिरणः, शीतकिरणश्चेत्यर्थः ।

यानियानि प्रकाशकत्वयुक्तानि वस्तूनि रत्नादीनि तेषां प्रकाशकत्वशक्तिरर्कादेव जायत इत्यर्थः । अत एव त्रैलोक्यदीपस्त्रैलोक्यस्य प्रकाशकत्वाद्दीपभूत इत्यर्थः ।

"प्रकाशकौ द्वौ प्रथमौ ग्रहाणाम् ।"

इत्यादिवचनेषु चन्द्रस्यापि प्रकाशकत्वमुक्तं तत्कथमेवेत्यत्राह-यः शशभृतो मूर्तित्वे परिकल्पित इति । यच्छब्दः सप्तस्वप्यवान्तरवाक्येषु योजनीयः । शशभृतश्चन्द्रस्य मूर्तित्वे-मूर्तित्वशब्देनामूर्तित्वव्यावृत्तिरुच्यते । अमूर्तानामदृश्यत्वं प्रसज्यतेऽतस्तस्यात्माभूदिति चन्द्रस्य दृश्यत्वकरणे परिकल्पितः सामर्थ्ययुक्तः । इदं व्यक्तमुक्तमाचार्येण संहितायाम्-

"सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम्।
क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः॥" इति।

सूर्यभटेनाप्युक्तम्–

"चन्द्रो जलमर्कोऽग्निः" इति।

तस्माज्जलस्वरूपः स्वयंप्रकाशशून्यश्चन्द्रः। सूर्यांशुसंस्पर्शवशाद्दृश्यमूर्तिर्भवतीत्यर्थः। तस्माच्चन्द्रस्य प्रकाशकत्वं रविकृतमेवेति सिद्धम्। तथा योऽपुनर्जन्मनां वर्त्म च भवति। अपुनर्जन्मनां पुनरावृत्तिशून्यानां वर्त्म मुक्तानां गमनभूमिरित्यर्थः। तथा चोक्तम्–

"द्वावेव पुरुषौ लोके सूर्यमण्डलभेदिनौ।
परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः॥" इति।

य आत्मविदामात्मेति तृतीयं वाक्यम्। आत्मानं विदन्तीत्यात्मविदः। क आत्मेति चेत् देहेन्द्रियमनोबुद्धिप्राणेभ्यो दृश्येभ्यो व्यतिरिक्तोऽन्तरतम आकाशवत्सर्वगतः सूक्ष्मो, नित्यो, निरवयवो, निर्गुणो, निरंजनो, गमनागमनादिरहितः, अहंकारममकारेच्छाद्वेषप्रयत्नरहितः, स्वयंज्योतिःस्वभावः, अत्युष्णवत्सवितृप्रकाशवच्चाकाशादिभूतरहितो, बुद्ध्यादिकरणरहितः, प्राणादिवायुभेदरहितः, सत्त्वादिगुणरहितः, अशनपिपासाशोकमोहजरामरणबुद्धिशरीरधर्मरहितो यः सर्वप्राणिहृदि स्थितः, सर्वबुद्धेर्द्रष्टा स आत्मेत्यभिधीयते।

तद्विदां निवृत्तिमार्गनिष्ठानां वेदान्तिकानां सिद्धान्तरूपेण प्रतिपाद्यो य आत्मा तत्स्वरूप इत्यर्थः। यो यजतां क्रतुश्च भवतीति सम्बन्धः। यो यजतां कर्मकाण्डनिष्ठानां गृहस्थानां क्रतुश्च, क्रतुर्हविःसंस्थसोमसंस्थादिभेदैर्बहुविधः, तत्स्वरूपो यजमानानामभीष्टफलदायी क्रतुदेवतास्वरूप इत्यर्थः। तथा योऽमरज्योतिषां भर्ता अमराणां ज्योतिषां च क्रतुषु हविर्भागभुजां क्रतुसम्पादनसाधनभूतधनधान्यवर्धकत्वद्वारेण भर्ता भरणशीलः। तथा चोक्तम्–

"अग्नौ शस्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥" इति।

यो लोकानां प्रलयोदयस्थितिविभुश्च भवतीत्यन्वयः। प्रलयोदयस्थितिविभुः प्रलयस्य संहारस्य, उदयस्य सृष्टेः, स्थितेः पालनस्य च विभुः प्रभुः कर्तुमकर्तुमन्यथाकर्तुमपि शक्तः प्रभुरित्युच्यते सांख्यैः। सृष्टिस्थितिसंहारकर्तृत्वेन प्रतिपादित ईश्वरस्तत्स्वरूप इत्यर्थः। यः श्रुतावनेकधायो रविः श्रुतौ वेदेऽनेकधाऽनेकप्रकारेण पठ्यत इत्यर्थः। इति सत्पापान्तरवाक्यानि अत्र पद्यवृत्तेन दर्शितानि। स तादृशः सर्वप्रकारोऽनेककिरणः अपवर्गप्रदः स्वर्गप्रदः सृष्टिस्थितिसंहारकर्ता

प्रसिद्धो रविर्नो वाचं दधात्वित्येवंलक्षणेन प्रधानवाक्येन सहात्राद्यश्लोकेऽष्टौ वाक्यानि । अत्राशीर्वादस्तन्मुखेनेष्टदेवतानमस्कारश्च प्रदर्शितः। तथा वस्तुनिर्देशश्चात्र वाक्यैः पदैः अक्षरैश्च यथासारं प्रदर्शितः । तद्यथा-

वस्तुनिर्देश इति । वस्तुनः प्रतिपादयिषितस्य प्रमेयशरीरस्य निर्देशः सूत्ररूपेण प्रकाशनमुच्यते । अत्र खलु होराशास्त्रे जातकफलप्रदर्शनविषये तन्मूलत्वेनाष्टौ सूर्य-सोम-कुज-बुध-गुरु-शुक्र-शनैश्चरा लग्नराशयश्च परिगृह्यन्ते । तत्र प्रधानवाक्यान्ते साक्षाद्रविशब्दयुक्तेन सूर्यः।शशभृच्छब्देन युक्तेन वाक्येन चन्द्रः सूचितः। वर्त्मापुनर्जन्मनामित्यनेन वाक्येनापवर्गविषयेणापवर्गस्य च सत्त्वैकसाध्यत्वात् परिव्राजकस्य, रणेऽभिमुखं हतस्य च सूर्यमण्डलभेदकत्वसामान्योक्तिबलात्सत्त्वरूपो भौमः सूचितः । अथवा भौमस्याग्नेयत्वादग्नेश्च योगसाधनत्वेनापवर्गस्य मूलत्वादपवर्गविषयेण भौमः सूच्यते । तथा चोक्तं योगप्रकरणे-

"मूलाधाराद्गतो वह्निर्द्वादशान्तमुपाश्रितः ।
पीयूषवर्षपर्णात्मा कामदो न तु मोक्षदः ॥
स हि चोर्ध्वं गतस्तस्मादपवर्गाय संभवेत् " । इति ।

एवमपवर्गस्य सत्त्ववद्भिः साध्यत्वात्समाधेश्च मूलाधारस्थितवह्निमूलत्वाच्च वर्त्मापुनर्जन्मनामितिवाक्येन सत्त्वात्मा आग्नेयो भौमोऽत्र सूचितः ।

आत्मविदामात्मेतिवाक्येन बुधनामधेयः विच्छब्दयुक्तेन बुधः सूचितः ।

क्रतुश्च यजतामिति वाक्येन 'क्रतूपयोग्यानि तपस्विनश्च द्रेष्काण० २५' इत्यादि । चापादि द्रेष्काणरूपेण स्रुग्भाण्डमुक्ताद्रेष्काणाः ३४' इत्याद्युक्तमीनादिद्रेष्काणरूपेण च सम्बन्धवान् धर्मक्रियाफलदो गुरुः सूचितः ।

तथा भर्तामरज्योतिषामिति वाक्येन भोगप्रधानः शुक्रः सूचितः ।

लोकानां प्रलयोदयस्थितिविभुरित्यनेन प्रलयकरः शनैश्चरः सूचितः ।

श्रुतावनेकधेतिवाक्येन राशित्वसम्पादकानेकत्ववाचकानेकशब्दयुक्तेन लग्नं राशिश्च सूचितः । ते च प्रत्येकं बहुविधविशेषयुक्तायुर्दायाष्टकवर्गे पृथग्विधेषु योगेषु च गृह्यन्त इत्येभिर्वाक्यैरत्र सूचिताः ।

तथा नवर्क्षचरणात्मकराशिचक्रगतानि सप्तविंशतिनक्षत्राणि सप्तविंशतिभिः पदैः सूचितानि ।

त्रैलोक्यदीप इतिपदेन जन्मनः पूर्वमपादानभूतस्यानूकशब्दवाच्यस्य पूर्वलोकस्य जननादिमरणान्तस्य चेह लोकस्य मरणात्परस्य गतिशब्दवाच्यस्य परलोकस्य चेतित्रयाणां लोकानां दीपत्वात्तत्रत्यसत्यसमस्तवृत्तान्तदर्शकत्वं भगवतो रवेः प्रतिपादयतो होराशास्त्रप्रतिपाद्यं वस्तु समस्तं सूचितम् । एतद्दृष्टजातकविषयम् ।

नष्टजातकविषयश्चात्र किंचिदक्षरसंख्यया सूचितम् । तद्यथा–

'मूर्तित्वे परिकल्पितः शशभृतो वर्त्माऽपुनर्जन्मनामात्मेति'

एतावतेतिशब्दांतेन श्लोकांशेन तत्प्रदर्श्यते । 'शब्दन्यायसमन्वितेषु' (१।३) इत्युत्तरश्लोके वक्ष्यमाणपदेनास्य शास्त्रस्य शब्दन्यायव्यतिरेकेणापि कश्चिदर्थवाचकत्वं प्रतिपादयिष्यमाणमत्राप्यनुसर्तव्यम् । मूर्तित्वे परिकल्पित इत्यत्र अपरिकल्पित इति पदच्छेदोऽप्यत्रापेक्ष्यते, तेन मूर्तित्वे अपरिकल्पितः शशभृत आत्मेति योजनीयम् । अस्यायमर्थः–मूर्तित्वमित्यक्षरसंख्यया पञ्चषष्ट्यधिकचतुःशतानि (४६५) भवन्ति । तत्रापरिकल्पित इति परिकल्पितसंख्यया शून्यः। परिकल्पितसंख्यया ततः शोधनीय इत्यर्थः । इयमत्र प्रक्रिया–

पञ्चषष्ट्यधिकचतुःशतानि (४६५) विन्यस्य ततः परिकल्पितशोधने (६११२१) कर्तव्ये एकविंशत्यधिकशतस्य शोधनं कर्तुं शक्यते, ततः परस्यांकद्वयस्य शोधनं यथान्यायं शोधनाविषयाशून्यत्वान्न शक्यते। अतः परिकल्पितसंख्यायां चतुर्थपंचमांकयोः शोधनं मूर्तित्वं संख्यायाश्चतुर्थपंचमांकयोः शून्यत्वात्पुनरपि तत्रैव मूर्तित्वसंख्यायां विलोमेन द्वितीयप्रथमयोरङ्कयोः कर्तव्यम् । तथा कृते पञ्चषष्ट्यधिकचतुःशतानि (४६५) अष्टाविंशत्यधिकत्रिशतानि (३२८) भवन्ति ।

यथा–४६५–६११२१–३२८–४६५,

१२१

३४४

१६

३२८

स च राशिः शशभृतः शशेन पंचपंचाशता (५५) भृतः पूरितः आत्मा भवति (यथा ३२८+५५=३८३) । अस्य शास्त्रस्य श्लोकसंख्यारूपं शरीरं भवतीत्यर्थः ।

मूर्तित्वे (४६५) संलाप (१३७) शोधनेन शश (+५५) क्षेपणेन च गोजाल (३८३) मित्यक्षरसंख्यया त्र्यशीत्यधिकानि त्रिशतानि अस्य शास्त्रस्यात्मभूतश्लोकप्रमाणभूतानि भवन्ति । आदेरारभ्य 'अध्यायानां विंशतिः पंचयुक्ता' (उपसं. ३) इत्यध्यायसंख्याकथनश्लोकावधिकानि गोजालप्रमाणानि (३८३) पद्यान्यत्र शास्त्रे वक्ष्यन्त इत्युक्तं भवति ।

अत्र श्लोकसंख्यानयनप्रकारे तिस्रः संख्या निर्दिष्टास्तत्र प्रथमा मूर्तित्वे (४६५) इति । द्वितीया परिकल्पितरहितमूर्तित्वं जरागौ (३२८) रिति । तृतीया परिकल्पितरहितं शशयुक्तं मूर्तित्वं गोजाल (३८३) मिति। एतासु प्रथमसंख्यास्थानत्रयगतानां संख्यानां पञ्चषट्चतुर्णां योगे पञ्चदश भवन्ति । द्वितीयसंख्यास्थानत्र-

यस्थानामष्टकद्विकत्रिकाणां, तथा तृतीयसंख्यागतानां त्रिकाष्टकत्रिकाणां च योगः सप्तविंशतिर्भवति । तस्मात्पञ्चदशघटिकाप्रमाणे नवांशः सप्तविंशतिनक्षत्रात्मको भवतीत्यर्थ उपलभ्यते। ततो लग्नगतनवांशनाडिका इच्छाराशिः सप्तविंशतिर्गुणकारः पञ्चदशभागहारः। एभिस्त्रैराशिके प्रष्टुर्जन्मनक्षत्रं लभ्यते । अत्र क्रियालाघवाय गुणकारभागहारयोस्त्रिभिरपवर्तने कृते नवकं गुणकारः पञ्चकं भागहारश्च भवति। लग्नचन्द्रयोस्तुल्यफलत्वाच्चन्द्रभुक्तनवांशनाडिकाभिरपि प्रष्टुर्जन्मनक्षत्रानयनं कर्तव्यम् । तथा चोक्तम्-

"नवांशके शीतगुभुक्तनाडिकां निहत्य रन्ध्रेण विभज्य पञ्चभिः ।
फलान्युडून्येव तथैव लग्नात् प्रवर्तनं भेष्विति नष्टजातकम् ॥ १ ॥" इति-

अन्योपि नष्टजातकप्रकारोऽत्र दिङ्मात्रेण सूचितः। उक्तोयं नष्टजातकप्रकारो लग्नविषयः । अथारूढविषयः प्रदर्श्यते-

'मूर्तित्वे परिकल्पितः शशभृतः इति द्वादशभिरक्षरैः स्वसंख्यावशाद्योजितैः षट्चत्वारिंशत्संख्यो राशिर्भवति स च शशभृतो मूर्तित्वे परिकल्पितः कर्कटराशेरारूढत्वे परिकल्पित इत्युक्तिबले तदानयनप्रकारोऽवगन्तव्यः । एकोनपंचाशद्राशिरत्र कूटस्थत्वेन परिगृह्यते तस्मादारूढचक्रशोधनं कर्तव्यम् । तत्प्रकारश्च-

"प्रियो मानी नटो गानी दानी यानी तनुः पटुः ।
भानुः खनिः धनिः सूनुः क्रमात्त्याज्यास्त्वजादितः ॥"
इत्यनेनोक्तः ।

मेषादिराशिषु क्रमेणारूढेषु सत्सु कूटस्थराशेः प्रियादयः शोधनीया इतिन्यायेन कर्कटराशावारूढे सति कूटस्थाद् गानीशोधनेन यथोक्तषट्चत्वारिंशत्संख्यो राशिर्भवति । स चात्र प्रदर्शितेन श्लोकसंख्याप्रमाणेन गोजालेन (३८३) स्थानत्रयसंख्यायोगवशात् संक्षिप्तेन चतुर्दशकेन हत्वा चतुष्पञ्चाशता विभज्य शिष्टे प्रष्टुर्जन्मनक्षत्रं लभ्यते । हारकः कुत्र प्रदर्शित इति चेदत्र मूर्तित्वे परिकल्पितः शशभृतो वर्त्म इति चतुर्दशभिरक्षरैः पंचपंचाशत्संख्यो राशिर्भवति। स चात्र अपुनः एकोनश्चतुष्पञ्चाशत्संख्यो भवति । सोऽत्र हारकत्वेन सूचितः तत्रापि यथोक्तयोर्गुणकारहारकयोर्द्वाभ्यामपवर्तनेन सप्तकं गुणकारः सप्तविंशतिर्भागहारश्च स्यात् । "सप्ताहतत्रिघनभाजितशेषमृक्षम्" इत्युक्तं भवति । कूटस्थराशेः सप्तकमपनीय, आरूढचक्रशोधनं कृत्वा शेषेण यथोक्तकर्मण्यनुष्ठिते लग्नराशिर्लभ्यते । एवमारूढविषयो नष्टजातके चतुःसाधनोऽनेन प्रकारेणात्र शृङ्गग्राहिकया सूचित इति द्रष्टव्यम् । एवं वस्तुनिर्देशोपि सम्यक् प्रतिपादितः । अत्राह गोविन्दः-

मूर्तित्व इत्यनेन श्लोकेन वराहमिहिराचार्यः शास्त्रं चिकीर्षुः स्वेष्टदेवतायाः स्वाभिमेतं वरं प्रार्थयते–स रविर्नो वाचं दधात्विति । 'अर्थबहुलं शास्त्रलघु प्रारभे' इत्युत्तरप्रतिज्ञां सफलीकर्तुमियं प्रार्थना विवक्षितार्थसर्वस्वगर्भा 'वाचं दधातु' इत्यर्थः । अथवा वागिति विद्याज्ञानं दधात्विति यावत् । अथवा त्रैकाल्य-कथनेऽवन्ध्यां वाचं दधात्विति वा । रावयतीति रविः । रवेः शब्दब्रह्ममयत्वात् रवेरेव वाक्प्रार्थना युज्यते । यः शशभृतो मूर्तित्वे परिकल्पितः शशभृतश्चन्द्रस्य मूर्तित्वे शरीरत्वे परिकल्पितः परितः कल्पितः परिकल्पितः आगमानुमानप्रत्यक्षरूपैः प्रमाणैः प्रामाणिकैः परिकल्पितः । 'सुषुम्णासूर्यरश्मिश्चन्द्रमाः' इत्यादिश्रुतिः ।

श्रीसाम्बस्तुतौ चोक्तम्–

"नाशं नास्मच्चरणशरणा यान्त्यपि ग्रस्यमाना
दैवैरित्थं सितमिव यशो दर्शयन् स्वं त्रिलोक्याम् ।
मन्ये सोमं क्षततनुममागर्भवृद्ध्या विवस्व-
ञ्छुक्लच्छायां नयसि शनकैः स्वां सुषुम्णांशुभासा ॥"

प्रकाशशून्ये जलमये चन्द्रमसि रविरश्मिसम्पातात् सप्रकाशं चन्द्रशरीर-मुत्पद्यत इति युक्त्या सिद्ध्यति । अर्केन्दुध्रुवामर्कस्य महीयोरूपं पश्चिमाभिमुखं भ्रमति ज्योतिश्चक्रे प्राङ्मुखं गच्छन्तश्चन्द्रादयो ग्रहा गोलरूपास्तत्रैव स्थितस्य प्राङ्मुखगतस्य गोलरूपस्य रवेः रश्मिसम्पातात् सूर्याभिमुखसार्धभागा दीप्यन्ते । तथा चार्यभटः–

"भूग्रहभानां गोलार्धानि स्वच्छायया विवर्णानि ।
अर्धानि यथासारं सूर्याभिमुखानि दीप्यन्ते ॥" इति ।

अन्येऽप्याहुः–

"अर्काधःस्थस्येन्दोरूर्ध्वार्धं ह्यर्करश्मयो यान्ति ।
दृश्यार्धमतः कृष्णं तदार्कभतः पूर्वके तु चन्द्रमसि ॥
पश्चिमपार्श्वेऽर्ककरा लभ्यन्ते तत्र शौक्ल्यमतः ।
इन्दोरेवं वृद्धिः स्याच्छौक्ल्यस्य हि पूर्णता च पूर्णान्ते ॥
पश्चिमभागे कार्ष्ण्यं ततः क्रमात् सूर्यरश्मिराहित्यात् ।" इति ।

एतत्प्रत्यक्षतो दृश्यते च । तस्मान्मूर्तित्वे परिकल्पितः शशभृत् इत्युपपन्नं भवति। अर्थान्तरमपि सूच्यते–

शशभृतो मूर्तित्वे परिकल्पितः सूर्यः । एतदुक्तं भवति शशभृतः प्रकृतिभूतस्य जडात्मकस्य चन्द्रस्य मूर्तित्वे प्रपञ्चरूपत्वे पुरुषभूतस्य चिदात्मकस्य सूर्यस्य रश्मि-वशाच्चेतनत्वं दृश्यते । तस्मात् प्रपञ्चव्याप्तः सूर्य इत्यर्थः । अथवा 'शशभृतो मूर्ति-

त्वे परिकल्पितो मनस्तुहिनगुः' इत्यनेन शशभृच्छब्देन मनो विज्ञायते । मनसो मूर्तित्वे परिकल्पितः, मनो यां यां मूर्तिं ध्यायति तत्तद्भावेपरिकल्पितः सगुणब्रह्म भूत्वा भक्तानामभिमतविग्रहमवलम्ब्याभीष्टं फलं ददातीत्यर्थः । परिकल्पित इत्यनेन काल्पनिकमस्य विग्रहवत्त्वमित्यपि सूचितम् ।

अथ 'वर्त्माऽपुनर्जन्मनाम्' इत्यस्यार्थो व्याख्यायते-

त्रैवर्णिकानामुपनयनानंतरं पितृमुखाद्गायत्रीं श्रुत्वा ब्रह्मचारिवानप्रस्थगृहस्थाश्रमावलम्बिनां सेवमानानामनुदिनं तिसृषु संध्यासु गायत्रीमन्त्रदेवतामादित्यमुपास्य संन्यासाश्रमस्याधिकारितामापाद्य संन्यासितामवलम्ब्य स्थितानां हि मोक्षसिद्धिः । तस्मादपुनर्जन्मनां मुमुक्षूणां मोक्षं गन्तुं भगवानादित्यो वर्त्मेति सिद्ध्यति । अथवा स्थूलसूक्ष्मपरत्वेन त्रिधा उपासना विद्यते, निराकारं परमात्मानं विग्रहवन्तं मन्त्राङ्गन्यासादिना परिकल्प्य या भगवत्सेवा मन्त्रावृत्त्या क्रियते सा स्थूलोपासनाऽधमाधिकारिणा विधीयते । पुनः मूलाधारादारभ्य ब्रह्मरन्ध्रान्तं मतभेदेन रक्तशुक्लतन्तुनिभां प्रभां ध्यात्वा सा प्रभा तदुपरिस्था । सार्धसोमं सूर्यं प्राप्य तस्मादमृतं स्रावयित्वा पुनरप्यमृतरूपेण मूलाधारं प्राप्य पुनरपि पूर्ववत् मूलाधारात् ब्रह्मरंध्रान्तं प्राप्येत्थं गमागमेन योपासना सा सूक्ष्मोपासना । एषा मध्याधिकारिणा विधीयते ।

अयं प्रकारः श्रीभगवत्पादाचार्येणोक्तः-

"मूलाधारात्प्रभृति तडिदाभा प्रभा सूक्ष्मरूपा
गच्छन्त्यामस्तकमणुतरा तेजसां मूलभूता ।
सौषुम्णान्तश्चरणनिपुणा सा पवित्रानुबद्धा
ध्याता सद्योऽमृतमथ रवेः स्रावयेत्सार्धसोमात् ॥" इति ।

पूर्वोक्तायाः स्थूलोपासनाया इयं प्रवरा निरवयवत्वादितोऽप्युत्कृष्टा परोपासना सच्चिदानंदरूपे ब्रह्मणि अहमिति भावना । तस्याः सिद्ध्यर्थं सूक्ष्मोपासनामङ्गीकुर्वंति मुमुक्षवः सूक्ष्मोपासनायाः सूर्यसापेक्षत्वात् मुमुक्षूणामपुनर्जन्मनां मोक्षप्राप्तौ सूर्यो वर्त्मेति सिध्यति ।

अथवा जन्तुर्निधनकाले यत्किञ्चित्तेजो ध्यायति चेत् पुनः शरीरं न गच्छति मुक्तिं प्राप्नोति च । सर्वतेजोमयः सूर्यः खलु । तथा चोक्तम्-'तेजसां गोलकः सूर्यः' इति । जीवितान्ते तेजश्चिन्तनात् मोक्षसिद्धिरस्तीति श्रीसाम्बेनोक्तम्-

"आस्तां जन्मप्रभृति भगवत्सेवनं तद्धि लोके
वाच्यं केनापरिमितफलं भुक्तिमुक्तिप्रकारम् ।
ज्योतिर्मात्रस्मृतिपथमतो जीवितान्ते विभास्वन्
निर्वाणाय प्रभवति सतां तेन ते कः समोऽन्यः ॥" इति ।

आत्मेत्यात्मविदामित्यत्रात्मविदात्मज्ञानिनामात्मा यदा ह्यात्मज्ञानं भवति तदैव मुक्तो भवति। तथा चोक्तम्—

"मोक्षस्य नैव किंचिद्धामास्ति न चापि गमनमन्यत्र।
अज्ञानमयग्रन्थेर्भेदो यस्तं विदुर्मोक्षम् ॥" इति

'ज्ञानादेव तु कैवल्यम्' इति श्रुतिवागपि श्रूयते। इति शब्दोऽत्र पर्याप्तौ वर्तते। आत्मविदामात्मेति निश्चित इत्यर्थः स्थूलसूक्ष्मोपासनयोः काल्पनिकत्वात्।

अथवाऽत्रेतिशब्दः प्रत्येकं सम्बध्यते। अपुनर्जन्मनां वर्त्मेति परिकल्पितः। यजतां क्रतुरिति परिकल्पितः, आत्मविदामात्मेति परिकल्पितः, इत्यादि। क्रतुश्च यजतामित्यत्र होतृरूपेण हुतभुग्रूपेण स्थितः कर्मसमुदायफलं ददातीति पूर्वमीमांसकसिद्धान्ते कर्मसमुदायरूपेण स्थित इत्यर्थः

भर्तामरज्योतिषामित्यत्र स्वोत्पादितेषु षट्सु ऋतुष्वपि तत्तदृतुजन्यानि द्रव्याण्यान्नादीन्युत्पाद्य देवानां हविर्भागमापादयति। अतः कारणादमराणां भर्ता भवति। आकाशवर्तिनां ग्रहनक्षत्रादीनां स्वप्रभायोगवशात् प्रभावत्वमुत्पादयति तस्मात्तेषां च भर्ता भवति। अथवा रुद्रादीनां सूर्योपासनं विद्यते तस्मात्तेषां भर्तेति तथा चोक्तम्—

"यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोऽपि।
कुरुतेऽञ्जलिं त्रिनेत्रः स जयति धाम्नां निधिः सूर्यः ॥" इति।

'लोकानां प्रलयोद्भवस्थितिविभुः' इत्यत्र त्रिगुणानवलम्ब्येति मूर्तिभावेन लोकानां सृष्टिस्थितिसंहारान् करोतीत्यर्थः।

अथवा स्वोत्पादितेषु मेषादिराशिषु ग्रहस्थितिवशात् चतुःप्रकारसम्भवानां जन्तूनां जन्म विद्यते, रक्षणं, संहारश्च। तस्माल्लोकानां प्रलयोद्भवस्थितिविभुरिति युज्यते। च शब्देन प्रत्यहं लोकानां प्रलयोद्भवस्थितिविभुरिति सूचयति। उदये समस्तं जगत् प्रतिबोधमेति, मध्याह्नसमये स्वभावक्रियासु प्रसरति, अस्तसमये उच्छ्वसितमात्रं शेते,। तथा चोक्तम्—

"यस्योदये जगदिदं प्रतिबोधमेति मध्यं गते प्रसरति प्रकृतिक्रियासु।
अस्तस्थितौ स्वपिति चोच्छ्वसितैकमात्रं भानुः स एष जयति प्रकटप्रभावः॥" इति।

अनेकधा यः श्रुतौ वाचकभेदेऽपि वाच्यत्वमस्यैवेत्यर्थः। नैकांकिरणोऽसंख्यकिरणः अथवा सहस्रकिरण इति वा। पञ्चशतकिरणैर्भूमिषु द्रव्यरसमाददाति, अपरैः पञ्चशतकिरणैर्विसृजति जगदाप्यायनकर इत्यर्थः। त्रैलोक्यदीपस्त्रैलोक्यप्रकाशकः। अथवा त्रीन् भूतभविष्यद्वर्तमानान् लोकयति पश्यतीति त्रिलोकः त्रिलोकदर्शी तस्य भावस्त्रैलोक्यं त्रैलोक्यदीपस्त्रिकालदर्शी तेन दीपवत् सर्वं प्रकाशयतीति ॥१॥

(शार्दूलविक्रीडितम्)

भूयोभिः पटुबुद्धिभिः पटुधियां होराफलज्ञप्तये
शब्दन्यायसमन्वितेषु बहुशश्शास्त्रेषु दृष्टेष्वपि ।
होरातन्त्रमहार्णवप्रतरणे भग्नोद्यमानामहं
स्वल्पं वृत्तविचित्रमर्थबहुलं शास्त्रप्लवं प्रारभे ॥ २ ॥

अथ व्यापारस्य लोकानुग्रहविषयत्वं प्रदर्शयन् चिकीर्षितं प्रतिजानीते ।

अहं भूयोभिः पटुबुद्धिभिः पटुधियां होराफलज्ञप्तये, बहुशः शास्त्रेषु दृष्टेषु सत्स्वपि होरातन्त्रमहार्णवप्रतरणे भग्नोद्यमानां पटुधियां शास्त्रप्लवं प्रारभे इत्यन्वयः। भूयोभिर्बहुभिः पटुबुद्धिभिः पटुत्वं गुणसमग्रता तद्युक्तबुद्धिभिः । बुद्धेर्गुणाश्च-

"शुश्रूषा श्रवणं ज्ञानं ग्रहणं धारणं तथा ।
ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥" इतिप्रसिद्धाः ।

अनेन पटुबुद्धिभिरिति होराचार्याणां निर्देशेन होरातन्त्रनिर्वहणे ऊहापोहपटुत्वं विशेषणापेक्षते । यथोक्तम्-

"स्वस्थचित्तो विविक्तस्थः पञ्चसिद्धान्तकोविदः ।
ऊहापोहपटुः सिद्धमन्त्रो जानाति जातकम् ॥"

होराफलज्ञप्तये जातकफलावबोधनार्थं दृष्टेषु श्रुतिमूलत्वात् पराशरादिभिः साक्षात्कृतेषु । होरातन्त्रस्य पूर्वजन्मैहिकपारत्रिकविषयं (यस्य) बहुविधविशेषबोधकत्वाददृष्टपारकत्वेन महार्णवरूपणम् । अतस्तत्प्रतारणसाधकत्वाच्चिकीर्षितशास्त्रस्य प्लवरूपणं घटते । पूर्वशास्त्राणां शब्दन्यायसमन्वयकथनेन चिकीर्षितशास्त्रे शब्दन्यायव्यतिरेकेणापि क्वचिदर्थविशेषसूचनं ध्वन्यते । स्वल्पमपि सारसंग्रहरूपत्वात् सुखाध्येयमिति भावः । अर्थबहुलम् स्वशास्त्रस्य जातकविषयत्वेऽपि । प्रश्नशास्त्राद्यर्थानामपि प्रतिपादकत्वं द्योत्यते ।

पूर्वेषां शास्त्राणामभिधानाभिधेययोः शब्दार्थयोर्बाहुल्याद्दुर्गूढत्वेन होरातन्त्रमहार्णवप्रतरणं सुकरं भवेदित्यभिप्रायः ।

अत्राह गोविन्दः-

"भूयोभिरिति । इष्टदेवतायाः परमात्मनो रवेः स्वाभिमतं वरं प्रार्थ्य सिद्धं कृत्वा शास्त्रंचिकीर्षुरयमाचार्यश्चिकीर्षितप्रतिज्ञां करोति, शास्त्रप्लवं प्रारभे इति । किमर्थमिति चेत् । होरातन्त्रमहार्णवप्रतरणे भग्नोद्यमानां होराफलज्ञप्तये, अत्र महार्णवशब्दे नास्यापारत्वम्, गम्भीरत्वम्, विस्तीर्णत्वं च सूचयति । ततो मन्दमतीनां दुस्तरत्वात् सुखप्रतरणाय शास्त्रप्लवं प्रारभे इत्यर्थः"

शास्त्रप्लवमित्यत्र रूपकालङ्कारेण प्लवसाधर्म्यमभिव्यज्यते। कीदृशमिति चेत्। स्वल्पम्। ग्रन्थतः स्वल्पम्। पूर्वशास्त्रेभ्यः स्वल्पमित्यर्थः। वृत्तविचित्रम्। वृत्तैः शार्दूलविक्रीडितादिभिर्नानाविधम्। अर्थबहुलं बह्वर्थसमन्वितम्। ग्रन्थतः स्वल्पत्वेऽर्थतोऽपि स्वल्पत्वं भवतीति शंकापरिहारार्थमर्थबहुलमित्युक्तम्। अस्य शास्त्रस्यार्थसर्वस्वं कोऽपि न परिच्छिनत्तीत्यर्थः।

प्लवसाधर्म्ये वृत्तं वर्तुलं वृत्तं च तद्विचित्रं चेति वृत्तविचित्रमर्थबहुलं रत्नवस्त्राद्यनेकार्थसहितं प्लवमित्यर्थः।

होरातन्त्रमहार्णवप्रतरणे भग्नोद्यमानामित्यत्र भग्नोद्यमशब्देनान्यशास्त्राणि बहुशो निरीक्ष्य तत्सारासारं विभज्य निर्णेतुमशक्तानामनेन शास्त्रेण सुखावबोधो भवतीत्यर्थः। कथं भवति—

बहुभिः पूर्वाचार्यैर्निर्दोषेषु शास्त्रेषु कृतेष्वपि इदं शास्त्रं प्रारभ इत्यत्रायं विशेषः। पूर्वशास्त्रेषु पटुधियामेवाधिकारो न मन्दमतीनाम्। कथ्यमाने मच्छास्त्रे पूर्वशास्त्रेषु कृतश्रमाणामनिर्णीतशास्त्रतत्त्वानामप्यधिकारित्वमित्युक्तं भवति, होरातन्त्रमहार्णवप्रतरणे भग्नोद्यमानामित्युक्तत्वात्, कृतत्रेताद्वापरेषु गतेष्वचिरायुषो रोगभाजः पापिष्ठा मन्दमतयश्च जायन्ते तस्माच्छास्त्रस्य लघुकरणाभावे शास्त्रं पतिष्यत्येवेत्यभिप्रेत्यैतदुक्तं भवति। पराशरहोरायां पराशरमुनिं प्रति मैत्रेयवचनम्—

"संकरात्तु फलानां च ग्रहाणां गतिसंकरात्।
नान्येयमीदृशस्येति परिच्छेत्तुमलं नराः॥
कलौ युगे ततोऽल्पैव बुद्धिः पापोत्तरा नराः।
अतो न चास्य प्रचयगमनं न प्रयोजनम्॥
तत्र त्रेतायुगे केचिद्द्वापरे च कृते युगे।
कुशाग्रमतयः सर्वे पुण्यभाजश्चिरायुषः॥
ततोऽल्पबुद्धिगम्यं यच्छास्त्रमेतद्वदस्व मे।
आयुश्च लोकयात्रा च द्वे शास्त्रेऽस्मिन् प्रयोजनम्॥
निश्चेतुं कोनु शक्नोति वशिष्ठो वा बृहस्पतिः।
किं पुनर्मनुजास्तत्र विशेषाच्च कलौ युगे॥"

महार्णवपद्धतिविस्तीर्णगंभीरापारपूर्वशास्त्राणि पठितुं निर्णेतुमशक्तानामल्पे ग्रन्थाध्ययने बह्वर्थग्रहणाय स्वल्पशास्त्रं करोमीत्यर्थः॥ २॥

(इन्द्रवज्रा)

होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात्।
कर्म्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति॥ ३॥

अथ शिष्यप्ररोचनाय होराशब्दनिर्वचनपूर्वकं होराशास्त्रेऽभिधेयं प्रतिपादयति ।

एके पूर्वापरवर्णलोपादहोरात्रविकल्पं होरेति वाञ्छन्तीत्यन्वयः । 'एके मुख्यान्य-केवलेषु' इति सिद्धः । पूर्वापरवर्णलोपात् पूर्वापरवर्णलोपं विधाय पूर्ववर्णस्याकारस्य, अपरवर्णस्य त्रकारस्य च लोपं विधायेत्यर्थः । ल्यबलोपे पञ्चमी । अहोरात्रवि-कल्पं विशिष्टः कल्पो विकल्पः । जननेन वा प्रश्नेन वा अहोरात्रयोर्विकल्पः । अका-रत्रकारयोर्वर्णयोर्लोपं विधाय होरेति वाञ्छन्ति । जननोपलक्षितं वा प्रश्नोपलक्षितं वा तात्कालिकमहोरात्रावयवं होराशब्देन निर्दिशन्तीत्यर्थः । स च विशिष्टोऽहोरात्राव-यवस्तात्कालिकग्रहस्फुटानां लग्नस्य च निर्णयसाधनत्वेनास्मिञ्छास्त्रेऽवधारणीयः । तथा चोक्तं श्रीपतिना—

'ज्ञेयोऽत्र प्रथमं हि जन्मसमयः' इति । तदवधारणप्रयोजनमाह अत्र सा होरेत्याहर्तव्यम् । सा होरा पूर्वभवेऽर्जितं मदादिकम् यत्तस्य पक्तिं समभि-व्यनक्तीतिसंबंधः । पूर्वजन्मनि अर्जितं मदादि. आदिशब्देन सदसच्च गृह्यते । दृढकर्मोपार्जितं सत । अदृढकर्मोपार्जितमसत । दृढादृढकर्मोपार्जितं सदसदिति त्रिविधं यत्कर्म तस्य पक्तिं परिपाकं समभिव्यनक्ति सम्यगभिव्यनक्ति । तथा च सारावल्याम्—

"यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ।
व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव ॥" इति ।
"दशाप्रभेदेन विचिन्तयेद्दृढं दृढेतरं चाष्टकवर्गगोचरैः ।
दृढादृढं योगवशेन चिन्तयेदिति त्रिधा जातकसूक्ष्मसंग्रहः ॥" इति ।
फलचिन्तनस्य त्रैविध्यं चाचार्यैः प्रदर्शितम्—
"आधानजन्मापरिबोधकाले संप्रच्छतो जन्म वदेद्विलग्नात् ।" इति ।

वक्ष्यमाणनष्टजातकादिप्रश्नविशेषेषु प्रथमावधारणीयस्योदयलग्नस्य साधनभूत-दिनगतनाडिका निर्णेतुं कालारूढयोरवश्यं भाविनः सम्बन्धस्य प्रतिपादकसूक्ष्मराशि-प्रमाणमपि प्रदर्शितं होरेत्यहोरात्रविकल्पमित्यनेन । कथमिति चेन । लुप्लृच्छेदने, इत्यस्माद्धातोर्निष्पन्नस्य लोपशब्दस्य च्छेदार्थवाचकत्वेन च्छिन्नस्य च भागद्वयात्म-कत्वेन पूर्वापरवर्णविभागादिति अर्थात्सिद्ध्यति । ततो होरेत्यत्र पूर्ववर्णस्याधस्ताद-परवर्णो रेफः स्थाप्यः । एवं विभक्तेऽक्षरसंख्याया रत्नदानमिति प्राणद्वयाधिकाष्ट-विनाड्यात्मकं सूक्ष्मराशिप्रमाणमत्रोपदिष्टं भवति । षष्टिघटिकात्मकस्याहोरात्रस्य द्वादशधाविभागे पञ्चनाडिकया मेषादिराशयो भवन्ति । (मेषादीनां राशयश्चक्राणि) अत्रैकराशेः (एकचक्रस्य) पञ्चघटिकात्मकस्य षड्त्रिंशो भागो द्रेष्काणद्वादशांश-स्वरूपसूक्ष्मराशिप्रमाणं रत्नदानम् ($\frac{८}{२}$) तस्यापि त्रेधाविभागे सति त्र्यंशद्वय-

युक्तषोडशप्रमाणात्मकसूक्ष्मद्रेष्काण इभस्तुल्य ($\frac{१६}{१८}$) प्रमाणं स्यात् । शंकुच्छायाद्यवगते सावयवे प्रश्नकालादिगतेऽंतयोः सूर्यवारा चतुष्कक्षयः गुलिकवाक्य(स) संवादि (दी) सूर्यवारे विकल्पश्चतुष्कक्षयः षड्विंशतिर्नाडिकाः, सोमवारे तथा विकल्पः द्वाविंशतिः, भौमवारे ततोपि क्षयः अष्टादश, बुधवारे चतुर्दश, गुरुवारे दश, भृगुवारे षट, मन्दवारे द्वावित्यहोरात्रविकल्पशब्देन व्याख्यातम् । तस्मादहोरात्रविकल्पो गुलिकः तथा चोक्तम्–

"चन्द्रो रुद्रो जयो विद्या नयस्तेनखनी रवेः ।
त्रिशन्नाड्याह्नि गुलिकं दिनपंचकवान्निशि ॥" इति ।

गुलिकस्वरूपं चोक्तमन्यत्र–

"अथ गुलिकः क्रूरतमः शनैश्चरस्यात्मजः खलः पापः ।
सत्वाकृतिरत्युग्रो निगद्यते मृत्युरखिलसंहारी ॥
नीलाञ्जनसंकाशो रक्ताक्षो विषमभीषणो दीर्घः ।
पंचास्यः पृथुदंष्ट्रो भयंकरः सर्वदा गुलिकः ॥

इत्याद्युक्तस्वरूपो गुलिकोप्यत्र सर्वकालोपादानकारणत्वेऽत्र शास्त्रारम्भे प्रदर्शित इति वेदितव्यम् । अत्रान्योऽपि योजनाप्रकारः एके अहोरात्रविकल्पं पूर्वापरवर्णलोपाद्धोरेति वांछंतीति योजना । एके केचित्सम्प्रदायविद इत्यर्थः अत्रान्योपि योजनाप्रकारः अहोरात्रविकल्पमहोरात्रशब्देन द्वादशराशयः कथ्यन्ते, तेषां घटिकामण्डलसमानत्वात् । अथवाऽहोरात्रेत्यत्र हकारसंख्ययाऽष्टकं रेफेण द्विकप्रकारेण च द्विकमेतेषां संकलिते द्वादश लभ्यन्ते इत्यहोरात्रेण राशयः कथ्यन्ते एतेषां विकल्पश्चतुर्धा कल्पनमेकैकस्य राशेश्चतुश्चतुर्भागकल्पनं होरेति वांछन्ति पूर्वापरवर्ण लोपात्पूर्वापरवर्णलोपं निमित्तीकृत्य, पूर्वशब्देनलयरहितो यथापूर्व स्थायिधातुरुच्यते अपरशब्देन मूलं वक्ष्यते । वर्णशब्देन जीवः । लोपशब्देनापि नष्टं वस्तु उच्यते । पूर्वं चापरश्च वर्णश्च लोपश्चेति द्वन्द्वः । सर्वो द्वन्द्वोपि विभाषैकवद्भवति इत्येकवद्भावः धातुमूलजीवमृतानि वस्तूनि निमित्तीकृत्येत्यर्थः । मेषादिराशिषु चतुर्धा विभक्तेषु प्रथमो भागो धातुः । द्वितीयो मूलम् । तृतीयो जीवः । चतुर्थो मृतः इति कल्पनं होरेति वांछान्ति । इत्युक्तं भवति चतुर्भागस्य होरात्वकथनेन तत्र चतुर्भागे लग्नवत् संकलपनं कर्तव्यमिति द्योत्यते । एको राशिर्नवर्क्षचरणात्मकस्तस्यचतुर्भागः पादत्रययुक्तास्त्रयस्त्रिंशद्घटिका भवन्ति तत्र नवांशकः पादोनचतुर्नाडिकात्मको भवति पञ्चाशच्च पृथिव्यप्तेजोवाय्वाकाशघटिकात्मको भवति । द्वादशांशकः एकोनपञ्चाशद्विनाडिकायुक्तघटीद्वयात्मकश्च भवेत् इत्यादिभिर्धात्वादीनां विशेषा वक्तव्या, इति वियोन्यादिष्वाद्योपयोगाद्दशा द्योत्यते । तस्मादह्नो रात्रेश्च वृद्धिह्रासयोस्त्रैरा-

शिकेन गुलिकानयनं कर्तव्यमित्यपि द्योत्यते कालनिर्देशमात्रादेव ग्रहस्फुटानामुदय-लग्नस्य चानयनं गणितशास्त्रज्ञानादेव वेत्स्यति । गुलिकानयनमत्र व्यक्तमुक्तं च अतो जातकादिनिरूपणस्योपादानसर्वस्वमत्राविहितं भवति । अत्राह गोविन्दः-

'होरेति अहोरात्रस्य द्वादशपरिवर्तनकालस्य विकल्पं होरेत्येके वाञ्छन्ति । द्वादशराशिभिस्तदाश्रयैर्ग्रहैश्च हि सर्वं शुभाशुभं विचिन्त्यते ।' तथा च सारावल्याम्

"आद्यन्तवर्णलोपाद्धोराऽस्मात्संभवत्यहोरात्रात् ।
तत्प्रतिबन्धः सर्वो ग्रहभगणश्चिन्त्यते यस्मात् ॥" इति ।

अन्ये होरासंज्ञामन्यथा वर्णयन्ति यथैव तत्रैव सारावल्याम् -

"जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा ।
अथवा दैवविमर्शनपर्यायः खल्वयं शब्दः ॥" इति ।

आचार्यस्य तु पूर्वोक्तमेवाभिमतं तस्य युक्तिमन्त्वादहोरात्रविकल्पं होरेत्यत्र । विकल्पो विविधः कल्पः कल्पनाया विविधत्वं द्वादशराशितन्नवांशकद्रेष्काण-होरात्रिंशांशकादिभेदः अथवा अहनि निशि चाष्टभिर्विभक्तयांर्गुलिकयमघण्टकार्द्ध-प्रहरादयो भवन्ति । तैरपि शुभाशुभं चिन्त्यते अहोरात्रेषु अष्टभिर्विभक्तये सूर्यचार-श्चिन्त्यते । तथा चोक्तम्-

"यामार्द्धमुदयात्पूर्वमारभ्याष्टासु संस्थिताः ।
अङ्गारादित्रयादीप्तंशान्तमृत्स्नादिकत्रयम् ॥
ध्वज्ञोत्र शेषद्वितयं दीप्तः शान्तध्वजा इति ।"

एष विधिः सर्वेषां शुभाशुभशकूनां फलनिरूपणे ग्राह्यः । पुनः क्षणिकग्रहादि-संचारोप्यहोरात्रादेर्विज्ञायते । तस्मादहोरात्राद्धोराशब्दो व्युत्पाद्यते । इति युक्तं भवति किमस्य होराशास्त्रस्य प्रयोजनमित्यत्राह-

पूर्वभवं पूर्वजन्मनि सदादि यत्कर्म स्वोपार्जितं तस्य पक्तिं पाकं व्यञ्जयति इयं होरेत्यर्थः । अथवा पूर्वभवः आधानसमयस्तस्मिन्काले ग्रहराश्यादिभिः सदादि-कर्मफलं व्यञ्जयति ।

अथवा पूर्वभवः पूर्वे पितृपितामहादयस्तेषां भवे संसारे यत्कर्म सदादि पुण्यादि तत्फलं पुत्रपौत्रानुभावादयस्तानियं होरा व्यञ्जयति । अथवा पूर्वभवे पूर्वजन्मनि सदादि पुण्यपापव्यामिश्ररूपं यत्कर्म गर्भाधानादिप्रेतकार्यान्तं क्रियते तस्य हि तत्कालकृतस्य फलमयं कालः करोति । तथा चोक्तम्-

"सुखदुःखकरं कर्म शुभाऽशुभमुहूर्तजम् ।
जन्मान्तरेऽपि वा कुर्यात्फलं तस्यान्वयेपि वा ॥" इति ।

किं बहुना सर्वथापि कालरूपस्येश्वरस्य दृष्टादिकर्मफलदातृत्वमत्रोच्यते । तथा च जातकसंग्रहे-

"दृढादिकर्मत्रयकालमीश्वरः कालस्वरूपः प्रददाति देहिनाम्।
फलत्रयं यत्सदसद्विमिश्रं तत्संक्षये संक्षयकृत्तथा पुनः॥
तस्माच्छुभं कर्म शुभस्य कारणं फलस्य चान्यस्य यदन्यमित्यतः।
शुभे तु काले शुभकृत्फलं शुभं प्रयाति तस्मादिदमत्र चिन्त्यताम्॥
दशाप्रभेदेन विचिन्तयेद्दृढं दृढेतरं चाष्टकवर्गगोचरैः।
दृढादृढं योगवशेन चिन्तयेदिति त्रिधा जातकसूक्ष्मसंग्रहः॥
फलं क्रमात्तज्जगदुः पुरातनाः॥" इति।

तस्मादिदं होराशास्त्रमवश्यमध्येतव्यम्। पुरुषार्थोपयोगितयावगन्तव्यम्। अस्य शास्त्रस्यारम्भे त्वाचार्यः। ईश्वरस्यादित्यस्य प्रणिपातं कृत्वाऽस्माकं वाचं दधात्विति वरं प्रार्थितवान्। इति यत्तस्मादेतदध्येतॄणां भगवतो रवेः प्रसादादेव त्रैकाल्यज्ञानं भवतीत्युक्तं भवति। तथा चोक्तम्–

"अनेकहोराशास्त्रज्ञः पञ्चसिद्धान्तकोविदः।
ऊहापोहपटुः सिद्धमन्त्रो जानाति जातकम्॥"

संहितायामप्युक्तम्–

"तन्त्रे सुपरिज्ञाते लग्ने छायाम्बुयंत्रसंविदिते।
होरार्थे च सुरूढे नादेष्टुर्भारती वन्ध्या॥" इति।

अस्यायमर्थः तंत्रे सुपरिज्ञाते ग्रहगणिततंत्रे दृग्गणितसाम्येन सुपरिज्ञाते। तथा च जातकसंग्रहे–

"योगे ग्रहाणां ग्रहणेर्कसोमयोर्मौढ्ये तथा वक्रगतेषु पञ्चसु।
दृष्टानुरूपं करणं यदन्वहं तेन ग्रहेन्द्रान्गणयेत्त्रिवारकान्॥" इति।

लग्ने जन्मलग्ने प्रश्नलग्ने वा छायया शंकुच्छायादिना तज्ज्ञाने अम्बुयन्त्रैः कालज्ञानसाधनैर्वा लग्ने सम्यग्विदिते होराशास्त्रार्थतत्त्वे मनसि सम्यग्रूढे गुरुमुखाद्धोराशास्त्रार्थे समावगते गुरुदेवताप्रसादात् प्रकाशिते सति आदेष्टुर्दैवज्ञस्य वाङ्निष्फला न भवति इति॥ ३॥

(शार्दूलविक्रीडितम्)

कालाङ्गानि वराङ्गमाननमुरो हृत्क्रोडवासो भृतो
वस्तिर्व्यञ्जनमूरुजानुयुगले जङ्घे ततोऽङ्घ्रिद्वयम्।
मेषाश्विप्रथमा नवर्क्षचरणाश्चक्रस्थिता राशयो
राशिक्षेत्रगृहर्क्षभानि भवनं चैकार्थसम्प्रत्यये॥ ४॥

नवर्क्षचरणा इत्यनेन नवांशकानां प्राधान्यं सूचितम् । चक्रस्थिता इति राशीनां समुदायवशादेवं लग्नं मवहाक्षेमादेव न विशेषाश्च लग्नं राशीनां चक्रस्थिता इति चक्रवत्स्थिताः कुलालचक्रवत्तेषां समुदायसंस्थानम् अपमण्डले । तथाचार्यभटः-

"मेषादेः कन्यान्तं सममुदङ्मण्डलार्द्धमपयातम् ।
तौल्यादेर्मीनान्तं शेषार्द्धं दक्षिणेनैव ॥" इति ।

ग्रहाश्चार इति सूचितम् ।

चक्रस्थिता इत्यनेन भूचक्रसंस्थानमपि सूचितम् । मेषवृषौ प्राच्याम् । मिथुनमाग्नेय्याम् कर्किसिंहौ दक्षिणस्याम् । कन्या नैर्ऋत्याम् । तौलिवृश्चिकौ पश्चिमायाम् । धनुर्वायव्याम् । मकरकुम्भावुत्तरस्याम् । मीनमैशान्यामिति भूचक्रसंस्थानम् ।

"प्राच्यादिगृहे क्रियादयो द्वौद्वौ कोणगता द्विमूर्तयः ।" इति ।

वक्ष्यति चैतद्भूचक्रसंस्थानं दैवज्ञस्य समंताद्व्याप्तम् । अस्मिन् भूचक्रे यत्र प्रच्छकस्थितिः स राशिरारूढसंज्ञकः । प्रच्छके राशिचक्रं विलिख्य प्रागादिषु दिक्षु मेषादिराशीनुत्पाद्य तेषु राशिग्रहनक्षत्रादीन्सम्पूज्य प्रच्छकस्तेष्वेकं राशिं स्पृशेत् । तद्राशिं लग्नं कल्पयित्वा सर्वफलानि निरूपयितव्यानि । प्रच्छकारूढराशौ विज्ञाते स एव राशिरारूढत्वेन ग्राह्यः । प्रच्छकदैवज्ञयोः फलजिज्ञासायां पृच्छायामसत्यामपि दर्शनादेव फलं चिन्तनीयम् ।

तथा च वसिष्ठः-

"अपृच्छतः पृच्छतो वा जिज्ञासोर्यस्यकस्यचित् ।
होराकेन्द्रत्रिकोणेभ्यो शुभाऽशुभफलं वदेत् ॥" इति ।

शुभदिवसे ग्रहनक्षत्रराश्यादीन्संपूज्य दैवज्ञाय प्राभृतकं समर्प्य पृच्छत एवं दैवज्ञेन शुभाशुभं निरूपणीयम् अन्यथा न परमार्थफलविज्ञानासिद्धिः । शास्त्रनिराशोपि संपद्यते तस्माद्धर्मत्वं जायते । तथा चोक्तं मनुना-

"नापृष्टः कस्यचिद्ब्रूयान्नचाऽन्यायेन पृच्छतः ।
विजानन्नपि मेधावी जडवल्लोक आचरेत् ॥"

भट्टोत्पलेनाप्युक्तम्-

"रम्यतले भूभागे सम्पूज्य ग्रहगणं सनक्षत्रम् ।
पश्चात्प्रश्नविधानं कुर्याद्येनाप्नुयात्सिद्धिम् ॥
प्रष्टा मणिकनकयुतैः फलकुसुमैः राशिं विवाहकल्पिते काले ।
सुखासीनं सुखप्रियं दैवज्ञं भक्तितो नत्वा ॥
सम्पूज्य च यथाबलमुडुनिनामनी चोक्ता संपृच्छेत्स तु दैवतम् ॥"

"राशिक्षेत्रगृहर्क्षभानि भवनं चैकार्थसंप्रत्यये ।" इति ।

एतत्षडेकार्थसंप्रत्यये वर्तन्ते प्रत्ययो ज्ञानं संप्रत्ययः संज्ञानम्। तथा च हलधरः—
"प्रत्ययोधीनविश्वासशपथज्ञाननिश्चयाः॥" इति।

राशिपर्यायाणां षट्तया षड्राशयश्चिन्त्याः जातकेषु लग्नराशिरेकः, अपरश्चन्द्राधिष्ठितराशिः तयोरधिपतिस्थितराशिश्च। चन्द्रलग्नांशराशी चेति। प्रश्नादौ त्वेकस्तावदुदयः। अपर आरूढः। तृतीय उद्यन्नवांशराशिः। चतुर्थश्चन्द्रराशिः। पञ्चमः पृष्ठांशराशिः। षष्ठश्चन्द्राधिष्ठितराशिः। षड्भिरेतैः फलं निरूप्यत इति। एकार्थसंप्रत्यये एकस्यार्थस्य निर्णये षड्राशयश्चिंतनीया इति च सूचितम्। षड्वर्गफलबलं निरूपणीयमिति॥ ४॥

(वसंततिलका)

मत्स्यौ घटी नृमिथुनं सगदं सवीणं
चापी नरोऽश्वजघनो मकरो मृगास्यः।
तौली ससस्यदहना प्लवगा च कन्या
शेषाः स्वनामसदृशाः स्वचराश्च सर्वे॥ ५॥

अपिना भावसिद्धेनाक्षेपणात्रान्वयो निर्वहणीयः। मीनो राशिर्मत्स्यौ मुखपुच्छप्रतिबंधमत्स्यद्वितयाकारः। कुंभराशिः घटी, स्कन्धन्यस्तरिक्तघटः पुरुषः। सगदं सवीणं नृमिथुनं, गदाहस्तपुरुषः वीणाहस्ता नारी च। नवमो राशिश्चापी, धनुर्धरोऽश्वाकारोऽधःशरीरार्द्धो नरः। दशमो राशिर्मृगाकारपूर्वार्द्धः मकराकारोपरार्द्धः। सप्तमो राशिस्तुलाधरः पुरुषः। षष्ठो राशिः प्लवगा ससस्यदहनेन च सहिता कन्यका। शेषाः स्वनामसदृशाः। तत्र प्रथमो मेषाकारः, चतुर्थः कर्कटाकारः, पञ्चमः सिंहाकारः, अष्टमो वृश्चिकाकारः। सर्वे स्वचराश्च। सर्वे मेषादयो द्वादशराशयः स्वाकारसमुचितदेशचारिणस्ततो मेषो दिवा वनचरः रात्रौ ग्रामचरः तद्वद्वृषभः क्षेत्रचरश्चेत्यादिप्रदेशः। नष्टद्रव्यचोरादिस्थानज्ञानार्थमवगन्तव्यः।

अथोक्तानां राशीनां स्वभावाकृतिस्थानान्याह—मत्स्यौ घटीति संज्ञामात्रेण मेषादिराशयो लोकप्रसिद्धास्तेषां मेषादीनां नामानि न केवलं संज्ञामात्रप्रयोजनानि रूपानुरूपाणीत्युपदिश्यन्ते। शेषाः स्वनामसदृशा इति लोकप्रसिद्धाः। येषां नामश्रवणे अशेषाणां विशेषो नावगम्यते स एवात्रोपदिश्यते।

मत्स्याविति मीनराशिरित्युक्ते तस्य द्वित्वं न प्रतिभाति द्वित्वप्रतिभानाय मत्स्याविति द्विवचनम्। "लग्नं समेत्युभयतः पृथुरोमयुग्मम्।" इति वक्ष्यति तेनान्योन्यपुच्छाभिमुखमत्स्ययुगलं मीनराशिरिति च सिद्ध्यति। घटात्यनन

कुम्भराशेराकृतिरुच्यते । घटोस्यास्तीति घटी तस्मात्स्कंधविन्यस्तरिक्तघटः पुरुषः कुम्भराशिरिति च सिद्धयति । नृमिथुनमिति तृतीयो राशिः नरमिथुनं नारीनरौ सगदं सवीणमिति सगदः पुरुषः सवीणा नारीति योग्यतया विज्ञायते । चापी नरोऽश्वजघन इति धनराशिः चापोस्यास्तीति चापी धनुष्मान्पुरुषोश्वजघनः अश्वस्तुरगस्तस्य जघनमिव जघनं यस्य सोश्वजघनः नवमराशेरूर्ध्वभागश्चापपाणिर्मनुष्यः, अधोभागस्तुरग इत्युक्तं भवति । मकरो मृगास्यः पूर्वभागो मृगास्याकृतिः अपरभागो मकर इति सिद्धं भवति । तौली तुलाधरः पुरुषः । ससस्यदहना प्लवगा च कन्या, सस्यं दहनं च दधाना प्लवगा नौस्था इति जले, शेषाः स्वनामसदृशा इति मेषसिंहकुलीरकीटाः । मेषो मेषाकृतिः वृषो वृषाकृतिः । कर्किः कुलीराकृतिः । वृश्चिको वृश्चिकाकृतिः । स्वभावाश्च नामसदृशाः । मत्स्यौ घटीत्यनेन श्लोकेन लोकप्रसिद्धो नावगन्तव्यो विशेष उच्यते चेत्तादृशं विशेषणं मीनादिराशीनां न विदुः विशेषोस्त्येव । मीन इत्युक्ते मीनयुग्ममिति न वेदितव्यं वेदितव्यमेव "लग्नं समेत्युभयतः पृथुरोमयुग्मम्" इति स्वयमेव वक्ष्यति, तस्य नामश्रवणेन रूपसिद्धिर्न स्यात् तदेवं बहुषु नामसु सत्सु केवलत्वमनेनैवाचार्येणैव कथितम् । कल्याणवर्मणाप्युक्तं तथा च तद्वाक्यम्-

"कुम्भः कुम्भधरो नरोऽथ मिथुनं वीणागदाभृन्नरौ
मीनो मीनयुगं धनुश्च सधनुः पश्चाच्छरीरे नरः ।
एणास्यो मकरः ससस्यदहना कन्या च नौस्था जले
शेषा राशिगणः स्वनामसदृशो धत्ते तुलाग्रं तुला ॥ " इति ।

स्वभावास्तु स्वचराश्च सर्वे स्वचराः स्वस्थानचराः स्वेस्वे स्थाने चरंति । अथवा स्वचराः स्वभक्षाः 'चरगतिभक्षणयोः' इति धातुः । मेषस्तावत्कटुकोष्णादिभक्षणः । वृषस्तृणभक्षणः । मिथुनराशिरन्नपानादिलेह्यादिभक्षणः । कुलीरो मत्स्यादिभक्षणः । सिंहो मृगमांसादिभक्षणः । इत्याद्याकृतिसदृशानि भक्ष्याणि कल्प्यानि, स्वभावश्च तद्वत् । तथाहि मेषस्तावत्संचारशीलः, शीघ्राशनः, कुनखः तोयभीरुः कामीत्यादि । वृषः मन्दगामी, पृथुवक्त्रः, दीप्तोदराग्निः, क्लेशसहिष्णुरित्यादि । मिथुनो राशिस्तु गेयवाद्यकलाविद्यासु कुशलः, निधुवननिपुणः, हास्येङ्गितज्ञः, नृत्यज्ञः, भोजनतत्पर इत्यादि । कुलीरस्तु वक्रगतिः, जलतत्परः, जलाशयनिर्माणशील इत्यादि । सिंहस्तु पृथुवदनः, स्त्रीद्वेषी, तीव्रात्मा, मांसादिभक्षणतत्परश्च, गुहानिवासशीलः, उदरदन्तादिरोगपीडः, पराक्रमगर्वाधिकः, क्षुत्तृषार्दित इत्यादि । कन्याराशिस्तु सुरतप्रियः, लज्जान्वितः, परगृहवासी, प्रियभाषी इत्यादि । तुलाराशिस्तु क्रयविक्रयकुशलः, कृशचलदेहः, अर्थपतिः, वाणिज्यतत्पर इत्यादि । वृश्चिकराशिस्तु विषधरः,

श्वभ्रचरः, क्रूरचेष्ट इत्यादि । धनूराशिस्तु कुब्जांगः, सहायापेक्षी, समरोत्सुकः, धन्वापरार्द्धे तु दीर्घमुखः, वीर्यान्वितः, स्थूलदन्तः; राजसन्निधिनिवासशीलः इत्यादि। मकरराशिस्त्वधःकाये कृशः, सुन्दरनेत्रः, अल्पस्पृक्, शीलता इत्यादि । कुम्भस्त्व-ल्पजलार्थी, पृथुरूपः, भारवाहीत्यादि । मीनराशिस्तु मनोज्ञदेहः, बृहच्छिराः सुन्दरनेत्रः, जलचरद्रव्यभोक्तेत्यादि ।

मेषवृषादिजन्तूनां स्वभावानन्यांश्च लोकतः शास्त्रतश्च विज्ञाय फलनिरूपणे योजयेत् ।

अत्राचार्येण राशीनां चतुष्पदमनुष्याम्बुचरसरीसृपयोनित्वं पौरग्रामारण्यत्वं च स्वचराश्च सर्वं इत्युक्तत्वात्सिद्धं भवतीति अतो नोक्तम् । मेषवृषौ चतुष्पादाविति को न जानाति । अश्वजघन इत्युक्तत्वाद्धनुषोऽन्त्यार्द्धस्य साश्वत्वाच्चतुष्पदत्वं केन न ज्ञायते । मकरपूर्वार्द्धस्य मृगास्यत्वात्तस्यापि चतुष्पात्वं न वक्तव्यम् । मिथुनकन्या-चापाद्यर्द्धकुम्भानामप्युक्ताकृतिविशेषान्मनुष्यत्वमवगंतव्यम् । कर्कस्य कुलीरत्वात्की-टस्य वृश्चिकत्वादन्त्यस्य मीनत्वाच्च सरीसृपत्वमूह्यम् । कुलीरमकरान्त्यार्द्धमीनाना जलनिलयत्वाज्जलराशित्वमपि केन नावगम्यते तौलिराशेर्वणिक्त्वात्कन्याराशेर्नौ-स्थत्वान्नवमराशेर्धनुर्धरत्वाद्राजसंनिधिनिवासाच्च पौरत्वं केन न वक्तव्यम् । नार्य्यपि कदाचिन्नावमारोहतीति न चित्रम् । मेषवृषमिथुनकुम्भानां ग्रामवासित्वमपि लोके दृश्यत इति नोक्तम् । मृगपतिमकरार्द्धयोराकृतिकथनादेवारण्यत्वमुक्तम् । तथा च कृष्णाचार्येणैतत्सर्वं स्पष्टतरमुपदिश्यते–

"मेषो वृषोथ सिंहस्तुरगान्त्यार्द्धं मृगस्य पूर्वार्द्धम् ।
योनिश्चतुष्पदानां मध्ये जनुषो भवेन्मर्त्यः ॥
कन्याघटमिथुनतुलाहयार्द्धमाहुर्मनुष्ययोनिरिति ।
कर्कटझषकुंभचरा मृगापरार्द्धं च जलयोनिः ॥
वृश्चिककुलीरमीनाः सरीसृपाणां वदंति योनिरिति ।
मृगपतिमकराद्यर्द्धावारण्यौ सर्वभावेषु ॥
अरण्यमिति च मेषं वदंति होराविदः केचित् ।
कन्यातुले च तुरगो राशिषु पौरा विनिर्दिष्टाः ॥
मेषवृषकुम्भमीना ग्राम्या इति सूरिभिः समाख्याताः ॥" इति ।

'मत्स्यौ घटीति' विलोमोक्त्या क्वचिद्विलोमतो निरूपणीय इत्युक्तं भवति । स्थानविधिस्तु मेषादीनां जन्तूनां यानि निवासस्थानानि लोकेषु दृश्यन्ते तान्येवात्र निरूपितव्यानि । राश्याकृतिस्थानस्वभावकथनस्य प्रयोजनं तु यत्रयत्राकृतिस्वभाव-

विशेषापेक्षा जन्तूनां स्थानविशेषपरिज्ञानापेक्षा च विद्यते तत्रतत्रानेन विधिना विनियोगः । शुभनिमित्तोप्यनेन श्लोकेन मत्स्याविति सूच्यते ।

जलचरो मत्स्ययुगलम् । घटीति पूर्णकुंभधरः । नृमिथुनमिति नरयुगलं, सगदं सवीणंमिति गदाखड्गादिस्वकीयायुधधारी पुरुषः, सवीणमिति वीणावेणुमृदङ्ग-शंखपटहाद्यं तन्नादः । चापी नरो चापधरः पुरुषो विशेषायुधभृत्सुशस्तः, अश्वजघनो ऽश्वारूढः । मकरः पृथुरोमा सभेदः मृगास्यः मृगाणामपृष्ठभागदर्शनम् । तौलिः श्रीमान्वर्द्धमानो वणिक । ससस्यदहना सस्यादिद्रव्याणि दहनशब्देन ज्वलदग्निः नावाभिमुख्यकन्या मङ्गलानि निमित्तानि । शेषाः स्वनामसदृशाः नामश्रवणेन दर्शनेन वा दृङ्मनसोर्यत्र प्रसादो भवति तन्निमित्तन्तु शुभम् । तथा च भट्टोत्पलः-

"दृङ्मनसोः प्रीतिकरं प्रश्ने यद्दर्शनं च यच्छ्रवणम् ।
माङ्गलिकं द्रव्याणां भवति शुभं निर्दिशेत्तत्र ॥" इति ।

नामशब्देन गौणनामानि गृह्यन्ते एतदुक्तं भवति भाववाचिनां शब्दानामपि नामत्वं परिणमति । यथा द्वैधीकरणक्रियायां छेदनमिति नाम विदारणक्रियां भिदा इतिनाम, तथासति छेदनं प्रश्नकाले दृश्यते चेत्प्रष्टुः कार्यस्यापि तत्सादृश्यं भवति विनाशो भवतीत्यर्थः । एवं येये शब्दाः क्रियावाचिनश्च शुभा अशुभाश्च ते सर्वे प्रश्नकालेऽवश्यमवगन्तव्याः । शेषाः स्वनामसदृशा इति वचनादपि च स्वनामसदृशाः स्वस्वसंज्ञासदृशाः । पुंनामानः पुंसां स्त्रीनामानः स्त्रीणां शुभाः । एतदुक्तं भवति दक्षिणभागः पुरुषभागः वामभागः स्त्रीभागः । महादिशश्चतस्रः पुरुषाणां, विदिशश्चतस्रःस्त्रीणां शुभं भवति । गर्भप्रश्ने प्रष्टुः पुंनामकथने पुरुषो जायते, अन्यथा स्त्री जायते इति निरूपणीयम् । स्वचराश्च सर्वे इति प्रश्नकाले यदुक्तं यद्दृष्टं यच्छ्रुतं तत्सर्वं सादृश्येन प्रष्टुर्वदेत् । स्वचराः स्वपक्षचरा एतदुक्तं भवति । विवाहप्रश्ने यादृशी तत्र दृश्यते तादृश्याः कन्यकायाः विवाहः । संततिप्रश्ने यादृशः पुरुषो दृश्यते स्त्री वा तादृशः पुरुषोऽङ्गना चेति वक्तव्या । ननु मत्स्यौ घटीत्यादि श्लोकेन शुभनिमित्तमपि सूच्यते इति यदुक्तं तत्केनावगम्यते एते शुभनिमित्ता इत्यनुक्तत्वादुच्यते स्वचराश्च सर्वे इत्यनेन कथमवगम्यते एते शुभा इति । स्वचराः स्वकीयचराः स्वाभिप्रेतार्थगमकाः इत्यर्थः ॥ ५ ॥

(त्रोटकः)

क्षितिजसितज्ञचन्द्ररविसौम्यसितावनिजाः
सुरगुरुमन्दसौरिगुरवश्च गृहांशकपाः ।

अजमृगतौलिचन्द्रभवनादिनवांशविधि-
र्भवनसमांशकाधिपतयः स्वगृहात्क्रमशः ॥ ६ ॥

क्षितिजसितज्ञादयो गृहांशकपा भवन्तीति शेषः। क्षितिजो मेषराशेर्मेषनवांशकस्य मेषद्वादशांशकस्य चाधिपतिर्भवति। सितो वृषराशेर्वृषनवांशकस्य वृषद्वादशांशकस्य चाधिपतिर्भवतीत्याद्यनुसंधेयम्। नवांशाधिपतिरजमृगतौलिचन्द्रभवनादिरिति संबंधः। मेषराशौ मेषादिचापान्तानां नवांशानां संभवात्। वृषभे मकरादिकन्यान्ताः। मिथुने तुलादिमिथुनांताः। कर्कटे कर्कटादिमीनांता नवांशा भवेयुरित्यनुवादः। अतो मेषादिचतुष्के षट्त्रिंशन्नवांशकाः। राशेर्नवर्क्षचरणत्वादेको नवांशकः एकं नक्षत्रचरणम्। ततो मेषवृषमिथुनकर्कटनवांशकात्मकमश्विनीनक्षत्रम्। सिंहाद्यंशचतुष्कं भरणी, चापाद्यंशचतुष्कं कृत्तिकानक्षत्रमित्यादिफलाः कुजस्य भावस्थस्य सेनाधिपतित्वादजमृगतौलिचन्द्रभवनादित्यत्र चन्द्रभवनस्य कर्क्यादीनि स्वल्पशब्दवाच्यत्वे चन्द्रभवनप्रयोगात्कोऽप्यभिप्रायो गम्यते। मत्स्यौ घटीतिग्रन्थेन निर्दिष्टस्वरूपाणां राशीनां स्वाधिपतिग्रहैर्भूतैः फलनिरूपणे चन्द्रोऽपि विशेषान्निरूपणीय इति सूचितम्।

"भवनसमांशकाधिपतयः स्वगृहात्क्रमशः।"

द्वादशांशकाधिपतयः स्वगृहात्क्रमश इति। मेषे मेषांशात्प्रभृतीत्यादि, तेषामधिपाः पूर्वोक्ता इति। सुरगुरुमन्दसौरिगुरवश्चेत्यत्र विलोमेन सृष्टिक्रमः सूचितः।

मीनराशेर्गुरुरधिपतिर्गुरोराकाशो भूतम्। कुम्भस्य मन्दोऽधिपतिस्तस्य वायुभूतम्। मकरचापयोस्तयोरेकाधिपतित्वात्पुनरुक्त्या तौ गृह्येते। वृश्चिकस्य कुजोऽधिपतिः कृत्तिकानक्षत्रमित्युक्तं भवति। एवं नवनव नक्षत्राणि षट्त्रिंशद्भिर्नवांशकैर्भवन्ति। भवनसमांशकाधिपतयः द्वादशांशकाधिपतयः स्वगृहात्क्रमशो भवंति स्वंस्वं राशिमारभ्य द्वादशांशका भवंतीत्यर्थः। मेषे मेषादिमीनान्तः। वृषे वृषादिमेषान्तः। इत्यादि। अत्राह गोविन्दः-

इदानीं राश्यधिपानाह-क्षितिजेत्यादि क्षितिजादयो गुर्वन्ताः गृहांशकपाः, गृहाणाम् अंशकानां च पतयः। मेषाश्विप्रथमा इति, मेषस्य प्रथमोक्त्या मेषाधिराश्यधिपा इति वक्तव्यम्। अजमृगतौलिचन्द्रभवनादिर्नवांशविधिरित्यजादिचापान्तो मेषनवांशविधिः। मृगादिकन्यान्तो वृषे। तुलादिमिथुनांतो मिथुने। कुलीरादिमीनान्तो कर्कटे नवांशविधिः। पुनरप्येवमेव राशीनां नवांशकानामधिपा उक्ता अनेनैव हि सर्वत्रोपयोगः। तथा च सारावल्याम्-

"भवनाधिपैः समस्तं जातकविहितं विचिंतयेन्मतिमान्।
एभिर्विना न शक्यं पदमपि गन्तुं महाप्राज्ञैः॥" इति।

गृहांशकपाः इति । गृहानंशकांश्च पान्तीति गृहांशकपाः । गृहशब्देन राशीनां जडत्वं सूचितम् । अधिपशब्देन ग्रहाणां चैतन्यत्वं सूचितम् । यथा कश्चित् पुरुषः स्वगृहाधिपतिर्भवति तथैव राश्यधिपो ग्रहो भवति । अधिपदौर्बल्येन राशेरपि दौर्बल्यं भवति । अधिपतेः प्राबल्ये राशेरपि प्राबल्यं भवति । तथा च शास्त्रान्तरे-

"लग्ने लग्नपतौ बलेन सहिते तत्तुल्यवीर्यं विदु-
स्तत्रैवोपचयस्थिते सति ततो वीर्योत्कटं जायते ॥ " इति ।

गृहांशकपाः इति समस्तपदकथनाद्राश्यंशाधिपयोः फलदाने बलवतः कर्तृत्वम् । 'बलयोगात्फलमंशकर्क्षयोः' इति वक्ष्यति च । राश्यंशाधिपयोर्भेदाभावोऽपि समासोक्त्या सूचितम् ।

यथा मेषलग्ने मेषेण तदधिपतिना भौमेन च फलं निरूप्यते तथा स्थितिरवगंतव्या 'वृत्तातामदृग्' इत्यादिश्लोके मानी अस्थिरधनः सेति । तस्याग्निर्भूतम् । तुलायाः शुक्रोऽधिपतिस्तस्य जलं भूतम् । कन्याया बुधोऽधिपतिस्तस्य पृथिवी भूतम् । एवं भूतसृष्टिक्रमः । तथा च श्रुतिः-

"आकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवीत्यादि" कालचक्रदशा सूच्यते ।

क्षितिजाद्यष्टपदानां समासः । सुरगुर्वादिचतुर्णां समासस्तेन दक्षिणर्क्षेषु मेषादिमीनांतं क्रमेण गणनीयम् । वृश्चिकादिचापान्तं व्युत्क्रमेण गणनीयम् । तदर्थं क्षितिजाद्यष्टपदच्छेदः कृतः । वामर्क्षेषु चापादिवृश्चिकान्तं क्रमेण गणनीयम् । मीनादिमेषान्तं व्युत्क्रमेण गणनीयम् । इत्युक्तं भवति । तदर्थं सुरगुरुमंदसौरिगुरवश्चेति पृथक् समासः । अजमृगतौलिचन्द्रभवनादिनवांशविधिरिति दशापहारः कथितः । मेषत्रिकोणराशीनां मेषादिनवांशकाधिपा दशापहर्तारः । वृषत्रिकोणराशीनां मृगादिनवांशाधिपा दशापहर्तारः । मिथुनत्रिकोणराशीनां तुलादिनवांशाधिपा दशापहर्तारः । भवनसमांशकाधिपतय इति । मेषादारभ्य मीनान्तं गणिते सति पुनरेव वृश्चिकादिव्युत्क्रमेण गणनीया इत्युक्तं भवतीति कालचर्याकृतः ॥ ६ ॥

(पुष्पिताग्रा)

कुजरविजगुरुज्ञशुक्रभागाः
पवनसमीरणकौर्प्यजूकलेयाः ।
अयुजि युजि तु भे विपर्ययस्थाः
शशिभवनालिझषान्तमृक्षसंधिः ॥ ७ ॥

अथ त्रिंशांशकानाह–अयुजि पवनसमीरणकौर्प्यजूकलेयाः कुजरविजगुरुज्ञशुक्र-भागाः भवन्ति। ओजराशौ पंचभागाः प्रथमं कुजस्य। ततः पंच शनेः। ततोऽष्टौ गुरोः। ततः सप्त बुधस्य। ततः पंच शुक्रस्येत्यर्थः। ते युजि विपर्ययस्थाः, युग्मराशौ ते ग्रहांशा उक्तविपर्ययेण, प्रथमं पंचांशाः शुक्रस्य। ततः सप्त बुधस्य। ततोऽष्टौ गुरोः। ततः पंच शनेः। ततः पंच कुजस्येति यावत्। शशिभवनालिझ-षान्तमृक्षसन्धिर्भवतीति। कर्कटवृश्चिकमीनानामन्त्यमृक्षयोः राशिनक्षत्रयोः समम-सितत्वादृक्षसन्धिर्भवति।

अथास्मिन्राशिचक्रे त्रयः खण्डा अत्रान्तशब्देन यस्य कस्यचिदवसाने वक्तव्ये कर्कटवृश्चिकमीनाः निरूपणीया इत्युक्तं भवति।

गोविन्दः–अथ त्रिंशांशकानाह–कुजरविजेत्ययुजि पवनसमीरणकौर्प्यजूकलेयाः संख्याः कुजरविजगुरुज्ञशुक्रभागाः। युजि तु ते विपर्ययस्था उक्तांशसंख्याभेदा ग्रहाश्च विपर्ययेण स्थिताः। शुक्रज्ञगुरुशनिकुजांशाः क्रमेण ज्ञेयाः युग्मराशावित्य-न्यदर्थान्तरं चिन्त्यम्।

यस्य त्रिंशांश उदितस्तद्दशाद्भवनादिष्ववकाशोऽवगन्तव्यः। कुजरविजयोः शुक्र स्याप्यल्पोप्यवकाशः। तथा कृष्णीये–

"ग्रहभागेष्ववकाशो भोजनविधिशयनमैथुनादि पुनः।
वाच्यो वर्णोत्कर्षो विप्रादीनां पुरोक्तानाम्॥" इति।

पुनरपि त्रिंशांशैः प्रयोजनमुपरिष्टाद्वक्ष्यति। शशिभवनालिझषांतमृक्षसंधिः। नक्षत्रराश्योर्युगपच्छेदस्थानं गण्डान्तसंज्ञः। अन्त्यशब्देनाशुभत्वं सूचितम्। तथा च सारावल्याम्–

"जातो न जीवति नरो मातुरवश्यं भवेत्स्वकुलहंता।
यदि जीवति गण्डान्ते बहुगजतुरगो भवेद्भूपः॥" इति॥ ७॥

(आर्या)

क्रियताबुरिजितुमकुलीरलेयपाथोनजूककौर्प्याख्याः।
तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्थम्॥ ८॥

मेषादीनां पारिभाषिकाणि संज्ञान्तराण्याह–मेषादयः क्रमशः क्रियादिसंज्ञका भवन्ति। गोविंदः संज्ञाविधानमाह–क्रियेति। मेषादीनां क्रियादयः संज्ञा उक्ताः। अथाष्टादीनां समासस्तौक्षिकादयो व्यस्ताः। तेनायं प्रोक्तस्तेनायमर्थः सूचितः।

आत्मादिचतुर्भावस्थापेक्षत्वमात्मनो धर्मसापेक्षत्वम्, धनस्य प्रवृत्तिसापेक्षत्वम्। पराक्रमस्यार्थागमसापेक्षत्वम्। सुखस्य च धन सापेक्षत्वम्। पुत्रसिद्धेर्धर्मसापेक्षत्वं

शत्रुक्षयस्य प्रवृत्तिसापेक्षत्वम् । कलत्रसुखस्यार्थागमसापेक्षत्वं, मरणरोगपरापवादादेः पापार्थनाशसापेक्षत्वम् एवं चतुर्भिः श्लोकैः राशिनामरूपप्रतिपादनं कालपुरुषस्य देहं चोक्तम् ॥ ८ ॥

(इन्द्रवज्रा)

द्रेष्काणहोरानवभागसंज्ञास्त्रिंशांशकद्वादशसंज्ञिताश्च ॥

क्षेत्रं च यद्यस्य स तस्य वर्गो होरेति लग्नं भवनस्य चार्द्धम् ॥९॥

षड्वर्गानाह-द्रेष्काणहोरानवभागसंज्ञाः त्रिंशांशकद्वादशसंज्ञकाश्च क्षेत्रं चैतेषु षट्सु यद्यस्य स तस्य ग्रहस्य वर्गो भवतीति यावत् । होरेति लग्नं भवति, तस्यार्द्धश्च होरेत्युदयलग्नस्य राश्यर्द्धस्य च संज्ञेति यावत् । अत्र कालपुरुषदेहप्रतिपादनानन्तरमुक्तानां षड्वर्गाणां द्रेष्काणादिक्रमेणोक्त्या कालपुरुषस्य मूलाधारादिषडाधाराः क्रमेण सूचिताः-

"मूलाधारे दृकाणः स्यात्पितृचिंता रविस्तथा ।
स्वाधिष्ठाने तु होरा स्यान्मातृचिन्ता तथा शशी ॥
मणिपूरे नवांशः स्याद्भ्रातृचिन्ता कुजस्तथा ।
अनाहते च त्रिंशांशे वाणीचिंता बुधस्तथा ॥
विशुद्धौ द्वादशांशः स्यात्पुत्रचिन्ता तथा गुरुः ।
आज्ञायां क्षेत्रमुद्दिष्टं जायाचिन्ता सितस्तथा ॥
द्वादशांशे शनैश्चारी नाशचिन्ता चिकीर्षिता ।
तत्रस्थैस्तदधीशैश्च बलाबलवशात्फलम् ॥ " इति ।

तत्र दिङ्मात्रमित्यवगन्तव्यम् ।

गोविंदश्च-वर्गसंज्ञामाह-द्रेष्काणादयः षट् कथितास्तेषु यद्यस्य स तस्य वर्गः । वर्गशब्देनोक्ता द्रेष्काणादयः षडपि ज्ञेया बुद्धीन्द्रियादिः । दशकाः ।

"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ।
नागः कूर्मश्च कृकलो देवदत्तो धनञ्जयः ॥
धनञ्जयव्यतिरिक्ता नव प्राणा नवांशकाः ।
नव प्राणा मनोबुद्धीन्द्रियादिदशकात्मकाः ॥"

नवभिः प्राणैर्द्वादशभिरिन्द्रियैरप्येकविंशतिविधसूक्ष्मशरीरमुत्पद्यते । तथा चोक्तं भगवत्पादाचार्येण-

"इह तावदक्षदशकं मनसा सह बुद्धितत्त्वमथ वायुगुण इति त्रिलिङ्गमेतदमुना पुरुषः सह संगतो भवति जीवतीति । स्थूलशरीरं तु त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्रमयम् । तद्राशिसंज्ञमिति । अन्यथा केचिद्राशिः स्थूलशरीरं द्रेष्काणः शरीर-

स्योर्ध्वमध्याऽधोभागेन त्रिधा भिन्नः। होरा वामदक्षिणभेदेन भिन्ना। नवांशः। क्षेत्रज्ञो, द्वादशांशा वायुमनोबुद्धयः, त्रिंशांशकाश्चक्षुरादीन्द्रियपञ्चक इत्येभिर्लग्नान्तैः षड्भिरपि फलदो भवति।"

तथा च सारावल्याम्–

"एभिः स्पष्टतरं तं प्रत्यक्षपरीक्षणं यस्मात्" इति।

होरेति लग्नं लग्नबलेन सर्वभावसिद्धिश्चिन्त्या। होराशास्त्रार्थनिरूपणविषयो लग्नराशिरेक एवेति। तथा च सारावल्याम्–

"जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा।"

तत्र जातके लग्नस्यार्द्धं फलमर्द्धं चन्द्रस्य। प्रश्नेऽप्युदयलग्नारूढयोस्तद्वत् अतो लग्नचन्द्रयोर्बलवतोः षड्वर्गफलं होराशास्त्रेण निरूपणीयमिति सूचितम्।

(वसंततिलका)

गोजाश्विकर्किमिथुनाः समृगा निशाख्याः
पृष्ठोदया विमिथुनाः कथितास्त एव॥
शीर्षोदया दिनबलाश्च भवंति शेषा
लग्नं समेत्युभयतः पृथुरोमयुग्मम्॥ १०॥

समृगा गोऽजाश्विकर्किमिथुना निशाख्याः कथिता इत्यन्वयः। विमिथुनाः ते एव पृष्ठोदया इत्यन्वयः। शेषाः शीर्षोदया दिनबलाश्च भवन्ति। तत्र विशेषमाह– पृथुरोमयुग्मं लग्नमुभयतः समेति मुखपुच्छप्रतिबंधनादतो मीनराशिरुभयोदयः।

गोविन्दः–गोजाश्वीति। गोऽजाश्वादयः षड्राशयो निशाराशयः अन्ये शेष दिनबला दिवाराशयः इत्युक्तत्वान्निशापतेरप्येते राशयो भवन्ति।

दिनबला इत्युक्तत्वाद्दिनपतेः राशय इत्युक्तम्। तथा चोक्तम्–

"सिंहः कन्या तुलाली च कुम्भान्त्यौ सूर्यराशयः।
अन्ये च राशयश्चान्द्रा द्युनिशाराशयश्च ते॥"

निशाराशयो निशाफलदाः। दिनराशयो दिनफलदा इति। पृष्ठोदया विमिथुना इति। पृष्ठेन उद्यन्तीति पृष्ठोदयाः अशुभा इत्युक्तम्। शेषाः शीर्षोदयाः शीर्षेण उद्यन्तीति शीर्षोदयाः। पृथुरोमयुग्मम् उभयतो लग्नं समेत्युदयतीत्यर्थः। पृष्ठोदयाः अशुभाः, शीर्षोदयाः अशुभदा इत्युक्तं भवति। तथा च कृष्णीये–

"पृष्ठोदयेषु सिद्ध्यत्यशुभं मूर्द्धोदयेषु शुभमुक्तम्।
उभयोदयेषु विमिश्रं ग्रहरहितेभ्यः फलं वाच्यम्॥" इति।

ग्रहयोगे ग्रहानुगुणं फलम् । पृष्ठोदये पापसंबंधेऽन्त्यमशुभम् । पृष्ठोदये शुभसम्बन्धे मध्यमत्वम् । तद्विपरीतं शीर्षोदयेषु वक्तव्यम् पृष्ठे । उदयो येषां ते पृष्ठोदयाश्चिरेण फलदा इत्यर्थः । अन्यथा शीर्षोदयाः । अन्यदप्यस्ति पृष्ठोदयस्थानां ग्रहाणां राशिषु दशासु पृष्ठ फलोदयः । शीर्षोदयस्थानामादौ उभयोदयस्थानां मध्ये फलोदयः । वक्ष्यति च-"पृष्ठोभयकोदयर्क्षगास्त्वन्त्यांतः प्रथमेषु पाकदाः" इत्यनेन पृष्ठोदयोभयोदयमूर्द्धोदयविज्ञापनेन प्रश्नजातकेषु बहुप्रयोजनमिति ॥ १०॥

(मन्दाक्रान्ता)

क्रूरः सौम्यः पुरुषवनिते ते चरागद्विदेहाः
प्रागादीशाः क्रियवृषनृयुक्कर्कटाः सत्रिकोणाः ॥
मार्तण्डेन्द्वोरयुजि समभे चन्द्रभान्वोश्च होरे
द्रेष्काणाः स्युः स्वभवनसुतत्रित्रिकोणाधिपानाम् ॥ ११ ॥

अन्यमपि राशिविशेषमाह-क्रूरः सौम्यः-ओजराशयः क्रूराः । युग्मराशयः सौम्याः । पुरुषवनिते ओजराशयः पुरुषाः, युग्मराशयस्त्रियः ते च राशयः चरागद्विदेहाः चराः स्थिरा उभयाश्च भवन्ति । पुनरपि तथैव क्रमतः । अतो मेषकर्कटतुलामकराश्चाराः इत्यादि सत्रिकोणाः क्रियवृषनृयुक्कर्कटाः प्रागादीनामिन्द्रादिदिशामीशा भवन्ति । अयुजि मार्तण्डेन्द्वोरोजराशौ राश्यर्द्धरूपा होरा प्रथमा सूर्यस्य, द्वितीया चन्द्रस्य । समभे चन्द्रभान्वोश्च समराशौ प्रथमा चन्द्रस्य होरा, द्वितीयार्कस्य । द्रेष्काणाः स्वभवनसुतात्रित्रिकोणाधिपानां स्युः राशित्रिभागरूपेषु द्रेष्काणेषु प्रथमस्तद्राश्यधिपस्य । द्वितीयः पंचमराश्यधिपस्य । तृतीयो नवमराश्यधिपस्य । मेषाश्चिप्रथमा इत्युक्तमत्र चिन्त्यम् । मेषाद्योजराशयः क्रूराः । वृषादियुग्मराशयः सौम्याः । ओजराशिषु जाताश्चिन्तिता वा पुरुषाः क्रूरा भवन्ति । युग्मराशिषु जाताश्चिन्तिता वा सौम्या भवन्ति । तथा च सारावल्याम्-

"ओजेषूग्राः पुरुषाः सौम्या युग्मेषु सर्वभवनेषु ।"

ओजराशिषु द्रव्याण्यपि रूक्षाणि । युग्मराशिषु द्रव्याण्यपि सौम्यानि । तथा च कृष्णीये भोजनप्रश्ने-

"ओजेषु रूक्षमन्नं द्रव्यन्तु युग्मे जलचरे वा" इति ।

तथा च सुरतप्रश्ने, ओजराशिषु विषमसंख्यं मिथुनकर्म, समराशिषु समसङ्ख्यमिति । तथा कृष्णीये-

"विषमेषु गृहराशिषु मैथुनमेकं द्विवारमितरेषु" इति ।

किं बहुना सर्वपदार्थानां विषमराशिषु क्रूरत्वं समराशिषु सौम्यत्वं च वक्तव्यम्। ओजराशयः पुरुषाः, युग्मराशयो वनिताः। ओजेषु चिन्तिताः पुरुषाः, युग्मेषु स्त्रियः। ओजराशिषु जाताः सत्त्वादिगुणयुताः। युग्मराशिषु जाताश्चापल्यादिस्त्री-गुणयुताः। ओजराशिषु ग्रहबहुत्वे पौरुषयुक्तो भवति पुरुषः, विपरीते विपरीत इति। अस्योपयोगे इयान्विशेषः। जातकेषु जन्मलग्नराश्योस्तदधिपतिस्थित-राश्योश्चौजयुग्मावगम्य जातानां क्रूरसौम्यत्वं पुरुषवनितात्वं च निर्णेतव्यम्। प्रश्ने तूदयारूढश्चात्र चन्द्राधिष्ठितराशिभिरेतच्चिन्त्यते इति। ते च रागद्विदेहाः, ते मेषादयश्चरस्थिरोभयाः। चरराशिषु सर्वे ग्रहा जन्मलग्ने चरस्थे चेज्जातो संचार-शीलः। स्थिरराशिगताः सर्वे चेत्स्थितिशीलाः। उभयराशिषु मिश्रस्वभावाः। गोचरफलनिरूपणं चैवम्—

"जन्मलग्नतदीशेषु चरस्थेषु चरत्यसौ।
स्थिरस्थेषु स्थितो जन्तुः द्वन्द्वस्थेषूभयात्मकः॥"

प्रश्नादावपि—चरराशौ चरभूतं फलं, स्थिरराशौ स्थिरं, न वृद्धिनाशावुभयोर्मिश्र-मिति। तथा च भट्टोत्पलः—

"स्थिरराशौ लग्नगते स्थानप्राप्तिं वदेन्न गमनं च।
रोगोपशमो नाशो द्रव्याणां स्यात्पराभवो नात्र॥
चरराशौ विपरीतं मिश्रं वाच्यं द्विमूर्त्युदये।
स्थिरवत्प्रथमार्द्धं स्यादपरं चरराशिवत्सर्वम्॥" इति।

पुनः धातुमूलजीवाश्चरादिभिरूह्याः। चरो धातुर्धातोर्नहि स्थिरवासः। न गच्छतीत्यगः, स्थिराणि मूलद्रव्याणि। द्विदेहाः देहशब्देन जीव ऊह्यः इति। प्रागादीशा इति—सत्रिकोणाः क्रियवृषनृयुक्कर्कटाः, मेषसिंहचापाः प्राचीशाः। वृषभकन्यामकरा दक्षिणेशाः। मिथुनतुलाकुम्भाः पश्चिमेशाः। कर्कवृश्चिकमीना उत्तरेशाः। अनेन दिक्परिज्ञानं प्रयोजनम् तथा चोक्तम्—

"राशिभ्यः कालदिग्देशा वयो जातिश्च लग्नगात्।" इति।

प्रागादीशाः क्षत्रियादिचतुर्वर्णेशाः सत्रिकोणाः क्रियवृषनृयुक्कर्कटाः इत्युक्तं भवति। मार्तण्डेन्द्वोरिति। होराधिपत्यमुच्यते। ओजराशौ मार्तण्डेन्द्वोः होरे समभे चन्द्रभान्वोश्च। अधिपतिबलसंपूर्ताविव होरायाः फलत्वम्, अन्यथा विफलत्वम्। तदर्थं मार्तण्डेन्द्वोरिति सम्बन्धार्थे षष्ठी। क्रूरः सौम्य इति। राशी-नामोजानां केवलं क्रूरत्वं, युग्मानां सौम्यत्वमूह्यमिति। द्रेष्काणाः स्युरिति स्वभव-नसुतत्रित्रिकोणाधिपानां लग्नपंचमनवमराशीनामधिपानां द्रेष्काणाः। वृषे शुक्रबुध-मन्दानामित्यादि। अन्यथाऽन्ये व्याचक्षते एकस्मिन्राशौ प्रथमपंचमनवमांशाधिपानां

द्रेष्काणाः। यथा मेषे कुजरविगुरूणाम्। वृषे शनिसितबुधानाम्। मिथुने शुक्रमन्दबुधानाम्। कुलीरे चन्द्रकुजगुरूणाम्। सिंहादिष्वेवमेव द्रेष्काणा इति। तथा च कृष्णीये-

"क्षितिसुतसितगुरुसौरा भृगुजबुधौ भार्गवश्च रवितनयः।
बुधचन्द्ररुधिरजीवा द्रेष्काणगणेश्वराः प्रोक्ताः॥" इति।

द्रेष्काणाः स्युरिति फलदाने शक्ता भवेयुरित्यर्थः। तस्मात् "द्वाविंशः कथितस्तु कारणं द्रेष्काणाः कथितास्तु सूरिभिः" इत्यग्रे वक्ष्यति।

प्रश्नादावपि-

"द्रेष्काणसदृशश्चौरो लग्नांशसदृशं धनम्।"

इत्याद्युक्तमाचार्येण। द्रेष्काणानां स्वरूपं 'कट्यां सितवस्त्रवेष्टितः' इत्यादिषट्त्रिंशद्भिः श्लोकैरुपरिष्टाद्वक्ष्यति तेनापि फलनिरूपणे प्राधान्यमवगन्तव्यम्॥ ११॥

(इन्द्रवज्रा)

केचित्तु होरां प्रथमां भपस्य वाञ्छन्ति लाभाधिपतेर्द्वितीयाम्।
द्रेष्काणसंज्ञामपि वर्णयन्ति स्वद्वादशैकादशराशिपानाम्॥ १२॥

होराद्रेष्काणयोः पक्षान्तरमाह-केचित्तु होरां प्रथमां भपस्य वाञ्छन्ति, भपो राश्यधिपः। द्वितीयां लाभाधिपतेः। प्रथमद्रेष्काणस्तद्राश्यधिपस्य द्वादशस्थानाधिपस्य द्वितीयः। एकादशस्थानाधिपस्य तृतीयः। अत्र गोविन्दः पक्षान्तरेण होराद्रेष्काणाधिपत्यमाह-केचिदिति। प्रथमां होरां तद्राश्यधिपतेः। द्वितीयां होराम् एकादशस्थानाधिपतेः केचिदाचार्या वाञ्छन्ति, न बहुमतामिति स्वाभिमतम्-'मार्तण्डेन्द्वोरयुजि समभे चन्द्रभान्वोश्च होरे' इति। प्रथमोक्तहोराधिपत्यविधिर्जातके पुनरुक्तः प्रश्ने इति वाऽऽचार्यमतम्। तथा चोक्तं कैश्चन-"रवीन्दू विषमे चन्द्ररवी चात्र समे क्रमात्। होरा स्याल्लग्नपस्यैव द्वितीया लाभपस्य तु॥ आद्या तु जातके प्रोक्ता द्वितीया प्रश्नकर्मणि॥" अथ द्रेष्काणसंज्ञामपि स्वद्वादशैकादशराशिपानामिति केचिदाचार्या वाञ्छन्ति। अथ द्रेष्काणाधिपत्यमपि त्रिप्रकारम्-"द्रेष्काणाः स्युः स्वभवनसुतत्रित्रिकोणाधिपानाम्" इति। अत्र स्वाधिपते राशेः प्रथमः द्रेष्काणः, द्वितीयः सुताधिपतेः तृतीयस्त्रित्रिकोणाधिपतेः इत्येकप्रकारः। चरागद्विदेहा इत्युक्तक्रमेण त्रिकोणगतचरराशिपतेः प्रथमद्रेष्काणः। स्थिरराशिपतेर्द्वितीयः। त्रिकोणगतोभयराशिपतेस्तृतीयो द्रेष्काणः। इति द्वितीयप्रकारः। द्रेष्काणसंज्ञामित्यादिना तृतीयः। केचित्त्वित्यत्र तु शब्देन विषयविभागोऽस्तीति सूचितम्। तत्कथमिति चेदुच्यते। आद्यः पक्षो जातकविधाने। द्वितीयो जातके। तृतीयः प्रश्ने। तथा च यवनेश्वरः-

"लग्नपुत्रशुभपाश्वरे गृहे पुत्रधर्मतनुपा युगे गृहे ।
धर्मलग्नसुतपास्थिरे गृहे जातके खलु दृकाण उच्यते ॥
सर्वराशिषु दृकाण उच्यते लग्नपस्य सुतपस्य चाप्यथ ।
धर्मपस्य तु विधानकर्मणि प्रश्न एव तनुरिष्फलाभपाः ॥"

आचार्यस्य तु जातके लग्नपुत्रधर्मेशानामेव सर्वराशिषु द्रेष्काणाधिपत्यमिष्टम् । किलाचार्यस्य श्रीवराहमिहिरस्य वचनस्यापि गंभीरत्वात्केन खलु तस्याभिप्रेतार्थो विज्ञायते । गुरुमुखात्सम्प्रदायेन ज्ञेयम् ॥ १२ ॥

(पुष्पिताग्रा)

अजवृषभमृगाङ्गनाकुलीरा
झषवणिजौ च दिवाकरादितुङ्गाः ।
दशशिखिमनुयुक्तिथीन्द्रियांशै-
स्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः ॥ १३ ॥

राशीनां ग्रहवशेन विशेषमाह–अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गा भवन्ति । दिवाकरस्य मेषस्तुङ्गः। चन्द्रस्य वृषस्तुङ्गः। इत्यादि । उच्चभागानाह–दशशिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्चेति । तत्रापि तुङ्गा इत्यध्याहार्यम् । तत्र मेषे दशभिरंशैस्तुंगो दिवाकरस्येत्यादि योजनीयम् । तेऽस्तनीचाः । ते ग्रहाः अस्तो नीचो येषान्तेऽस्तनीचाः उच्चानां सप्तमराशयो नीचास्तेषां दशाद्यंशाश्चातिनीचा इत्युक्तं भवति अत्राह गोविंदः–

सूर्यादीनामुच्चान्याह–अजेति अजादिसप्तराशयो दिवाकरादिसप्तग्रहतुंगाः दशशिख्यादयोऽत्युच्चांशा इत्यर्थः । तेऽस्तनीचाः दशशिख्याद्यंशकैरतिनीचाश्चोक्ताः। अस्य श्लोकस्येन्द्रदैवत्यच्छन्दस्तेनाजवृषभादिपंचराशय एकपदेनोक्तास्तदा पंचसु ग्रहेषु तुंगगतेषु जातो दिव्यो भवतीति सूचितम् । तथा च कृष्णीये–

"सुखिनः प्रकृष्टकार्या राजप्रतिरूपकाश्च राजानः ।
एकद्वित्रिचतुर्भिर्जायन्तेऽतः परं दिव्याः ॥" इति ।

(वसंततिलका)

वर्गोत्तमाश्चरगृहादिषु पूर्वमध्य–
पर्यन्ततः सुशुभदा नवभागसंज्ञाः ।
सिंहो वृषप्रथमषष्ठहयाङ्गतौलि--
कुंभास्त्रिकोणभवनानि भवंति सूर्यात् ॥ १४ ॥

उच्चोपदेशानंतरमुच्चतुल्यफलान् वर्गोत्तमानाह—चरगृहादिषु पूर्वमध्यपर्यन्ततो नव-भागसंज्ञा वर्गोत्तमा भवंति, सुशुभदाः। शत्रुनीचाद्यंशत्वेपि वर्गोत्तमानां शुभदत्व-मस्तीत्युक्तं भवति। मूलत्रिकोणत्वं च सिंहे रवेः क्षेत्रत्वं त्रिकोणत्वं च। कन्यायां बुधस्य क्षेत्रत्वं त्रिकोणत्वमुच्चत्वं चेत्यादिषु विशेषमाह—विद्यामाधवः—

"सिंहे विंशतिरादितो गवि परे सर्वेशकास्तुंगतो
मेषे द्वादश पंच योषिति परे तुंगाद्वयांगे दश ॥
जूके पंच घटे तु विंशतिरमी मूलत्रिकोणाह्वयाः।" इति।

गोविंदः वर्गोत्तमांस्त्रिकोणराशीनाह—वर्गोत्तमा इत्यादि। चरस्थिरोभयेषु क्रमात्प्रथमपंचमनवमनवांशा वर्गोत्तमा भवन्ति ते शुभदाः तथा च स्वयमेव वक्ष्यति—

"शुभं वर्गोत्तमे जन्म वेशिस्थाने च सद्ग्रहे ॥" इति।

"वर्गोत्तमस्वपरगेषु शुभं यदुक्तं तत्पुष्टमध्यलघुताऽशुभमुत्क्रमेण" इति।

मेषे मेषनवांशो, वृषे वृषनवांशो वर्गोत्तम इत्युक्तम्। अथ नवभागसंज्ञाश्च सुशुभदा इत्युक्तत्वाद्द्वादशांशाः शुभदा इति तर्कणीयम्। तथा च सारावल्याम्—

"वर्गोत्तमा नवांशाश्चाद्यमध्यान्तगाश्चराद्येषु।
सूतौ कुलमुख्यकरा द्वादशभागाः स्वराश्याद्याः॥" इति।

सिंहो वृष इत्यादि सूर्यादारभ्य ग्रहाणां सिंहो वृष इत्यादि सप्त त्रिकोणभव-नान्युक्तम्। त्रिकोणभवनानि भवन्तीति वचनात्त्रिकोणराशीनां स्वक्षेत्रेभ्यः प्राधान्यं सूचितम् ॥ १४ ॥

(वसंततिलका)

होरादयस्तनुकुटुम्बसहोत्थबंधु
पुत्रारिपत्निमरणानि शुभास्पदायाः।
रिष्फाख्यमित्युपचयान्यरिकर्मलाभ-
दुश्चिक्यसंज्ञितगृहाणि न नित्यमेके ॥ १५ ॥

राशीनां प्रश्नकालविशेषविषयं विशेषमाह—होरादयो राशयस्तनुकुटुम्बस-होत्थबन्धुपुत्रारिपत्निमरणानि शुभास्पदायाः रिष्फाख्यमिति वदन्ति। अरि-कर्मलाभदुश्चिक्यसंज्ञितगृहाणि उपचयानि भवन्ति। लग्नात् षड्दशैकादशराशयः उपचयसंज्ञा भवन्ति। शिष्टा राशयः अपचयसंज्ञा भवन्ति। अत्र मतान्तरमाह—एके उपचयत्वं न नित्यमिति वदन्ति। "अथोपचयसंज्ञा स्यात्त्रिलाभरिपुकर्मणाम्। न चेद्भवन्ति ते दृष्टाः पापैः स्वस्वामिशत्रुभिः" इत्यादिवचनदर्शनादेवमुक्तम्। इदं वराहमिहिराचार्यस्य नाभिमेतम्।

गोविन्दः—अथ होरादय इत्यनेन श्लोकेन लग्नादिद्वादशभावानां देहधनादिस्वरूपत्वमुच्यते। एतैर्द्वादशभावैः शरीरिणां प्रश्नजातकेषु समस्तपदार्थाश्चिन्त्यन्ते। अथ सम्यग्विज्ञातजन्मकालस्यैव जातकफलं चिन्त्यम्। तथा च संहितायाम्—

"तन्त्रे सुपरिज्ञाते लग्ने छायाम्बुयन्त्रसंविदिते।
होरार्थे च सुरूढे नादेष्टुर्भारती वन्ध्या॥" इति।

श्रीपतिश्चाह—

"ज्ञेयोऽत्र प्रथमं हि जन्मसमयश्छायादियन्त्रैः स्फुटैः" इति।

अत्राचार्येण सर्वशास्त्रसिद्धत्वाद्ग्रहगणिततन्वादिभावानयनं नोक्तं तदस्माभिः शिष्यहिताय प्रदर्श्यते।

छायाजलयन्त्रादिभिर्दिवसे रात्रौ वा सूर्योदयादस्तसमयाद्वा जन्मनि गतनाडीविनाड्यादिकालं सम्यग्विज्ञाय लग्नमानयेत्, तत्षड्राशियुक्तमस्तलग्नम्। पुनर्मध्यलग्नमानीय तस्मिन् षड्राशियुक्तं पाताललग्नमिति। चत्वारि लग्नान्युपरि वक्ष्यति च।

"कण्टककेंद्रचतुष्टयसंज्ञाः सप्तमलग्नचतुर्थखभानाम्" इति।

एवं लग्नचतुष्टयेनान्यभवनानयनप्रकार उच्यते। पाताललग्नं विन्यस्योदयलग्नं विशोध्य त्रिभिर्विभज्य लब्धमुदयलग्ने संयोज्य द्वितीयभावमानयेत् लब्धं द्विगुणीकृत्योदयलग्ने योजयेत्तृतीयभावो भवति। एवमस्तलग्नात्पाताललग्नं विशोध्य पंचमषष्ठभावौ साध्यौ। मध्यमलग्नादस्तलग्नं विशोध्याष्टमनवमौ साध्यौ। उदयलग्नान्मध्यलग्नं विशोध्यैकादशद्वादशभावौ च साध्यौ। तथा चोक्तं पराशरमुनिना—

"लग्नं सुखात्सुखं कामात्कामं खात्खं च लग्नतः।
त्यक्त्वैकद्विगुणं त्र्यंशं योज्यं लग्नादिषु क्रमात्॥"

आसन्नभावयोर्योगार्द्धं भावसन्धिः. भावारंभभावावसानप्रदेश इत्यर्थः। पराशर आह—'अत्रापि सूर्यवाराद्धं सन्धिः स्याद्भावयोर्द्वयोः। एवं भावाश्च विज्ञेया संधयो वा भवन्ति हि॥' इति। तथापि युक्तेनाप्युक्तम्—

"लग्नं पाताललग्नान्मदनभवनतो वेश्मभं चैव हित्वा
कामं खान्मध्यलग्नात्तदपि च ततो रामभक्तं च शिष्टम्।
चन्द्राद्विघ्नश्च युज्यात्तनुभवनमुखास्ते तु भावाः क्रमात्स्युः
प्राक्पश्चाद्भावयुक्तैर्दलमथ च तयोः सन्धयः स्युः क्रमेण॥" इति।

भाववशाद्भावफलभेदोऽत्र यवनेश्वर आह—

"भावांशैः समतां ग्रहः खलु गतः पूर्णं विधत्ते फलं
सन्धिस्थो न फलप्रदोऽन्तरगतस्त्रैराशिकेनैव च ।
भावा न्यूनमथ ग्रहस्य गणयेदंशाधिकं चाधिपै-
र्हत्वा चाप्यथ संधितोऽधिकमथ प्रोक्तं फलं भावजम् ॥" इति ।

चतुर्गुणितं भावग्रहान्तरं भावसाधनमित्युच्यते । एवं द्वादशभावा आनीयन्ते । होरादयस्तनुकुटुम्बेत्यादि । होरादयस्तनुः शरीरम् । कुटुम्बो भरणीयो जनः । सहोत्थो भ्राता बन्धुर्मातुलभागिनेयादयः । अरिशब्देन शत्रुरोगादिरुच्यते । पत्नी भार्या । मरणशब्देन द्रव्यनाशविपद्रोगपरापवादादिरुच्यते । शुभशब्देन भाग्यधर्मादिरुच्यते आस्पदशब्देनावलम्ब उच्यते । आयशब्देन सर्वाभीष्टागमः । रिष्फशब्देन पापरोगादिरुच्यते । इति शब्देनामी भावा एव सर्वजन्तूनां सर्वपदार्थज्ञापका इति सूचितम् ।

अरिकर्मलाभदुश्चिक्यानामुपचयसंज्ञा कृता यतः अत्र स्थिता ग्रहा उपचयकरा संघकारा अतस्तेषामुपचयसंज्ञेति । एके वर्णयन्ति । पापैः स्वाधिपतिशत्रुभिरदृष्टश्चेदुपचया अन्यथा नोपचया इति ।

"अथोपचयसंज्ञाः स्युस्त्रिलाभरिपुकर्मणाम् ।
न चेद्भवन्ति ते दृष्टाः पापैः स्वस्वामिशत्रुभिः ॥" इति ।

आचार्यस्यैतन्नैवाभिप्रेतम् ॥ १५ ॥

(वसंततिलका)

कल्पस्वविक्रमगृहप्रतिभाक्षतानि
चित्तोत्थरंध्रगुरुमानभवव्ययानि ।
लग्नाच्चतुर्थनिधने चतुरस्रसंज्ञे
द्यूनञ्च सप्तमगृहं दशमर्क्षमाज्ञा ॥ १६ ॥

लग्नादीनामेव संज्ञांतराण्याह—होरादय इत्यनुवर्तन्ते । होरादयः कल्पादिसंज्ञावन्तोऽपि भवन्ति । लग्नाच्चतुर्थनिधने चतुरस्रसंज्ञे भवतः । सप्तमगृहं द्यूनं च भवति । दशमर्क्षमाज्ञा च भवति । गोविंदः पुनरपि भावानाह—कल्पस्वेति । कल्पः स्वस्थः । स्वं धनम् । विक्रमं पराक्रमम् । गृहं भवनम् । प्रतिभा बुद्धिः । क्षतं व्रणः । चित्तोत्थः कामः । रंध्रं विपत् । गुरुः पिता, उपदेष्टा वा । मानो मानः । भवः संसारः । व्ययो द्रव्यनाशः । लग्नादारभ्यैवं द्वादशभावाः । चतुर्थनिधनयोश्चतुरस्रसंज्ञा । दशमर्क्षमाज्ञा, दैवज्ञैः दशमेनाज्ञा चिन्तनीया । लग्नादिषड्भावा एकेन पदनाक्ता अतः सप्तमादिषड्भावा दृश्यभागस्था इति सूचितम् । उपरितनाध्याये

पर्यायमन्यमुपलभ्य वदेच्च लोकादिति वक्ष्यति तस्मादन्यशास्त्रेभ्योऽप्येषां द्वादशभावानां पर्याया वेद्यास्तदत्रोच्यते। तथा च पराशरमुनिः।

"लग्नाच्छरीरचिन्ता स्याद्द्वितीयात्स्वं च पैतृकम्।
भरणीयं दृशं पापं पश्चादि च वदेद्बुधः॥
तृतीयात्स्वोदराद्बुद्धिं दुष्पूर्वां विक्रमं विदुः।
चतुर्थात्पितरं वेश्म सुखं लालित्यमेव च॥
सौमनस्यमपत्यादि प्रज्ञां मेधां च पञ्चमात्।
हानिं व्याधिमरिं षष्ठान्मैथुनं स्त्रीजयं ततः॥
मृतिं पराजयं दुःखं हानिं व्याधिं तथाष्टमात्।
सौशील्यं भाग्यधर्मांश्च नवमाद्दशमात्तथा॥
मानास्पदाज्ञाकर्माणि लाभाल्लाभं व्ययाद्व्ययम्॥" इति।

जातकसंग्रहेप्युक्तम्—

"लग्नाच्चिन्त्यं मूर्तिकीर्तिस्थितिं च वित्तं नेत्रं वाक्कुटुम्बं च वित्तात्।
धैर्यं वीर्यं भ्रातरं विक्रमेण विन्द्यात्क्षेत्रं वाहनं बांधवांश्च॥
बन्धुस्थानान्मातुलं भागिनेयं तोयं वेश्माजाविकादीन्सुखं च।
पुत्रं बुद्धिं पूर्वपुण्यत्वमान्द्यं षष्ठाद्व्याधीञ्छात्रवं द्विड्व्रणादीन्॥
मदनगमनजायालोकनान्यस्तभात्सु-
मरणहरणदासक्लेशविघ्नानि रंध्रात्।
गुरुजनपरपुण्यान्यौषधं भाग्यसिद्धिं-
नवमभवनतः खान्मानकर्मास्पदाद्यम्॥
सर्वावाप्तिं दुःखहानिं भवाख्याद्रिष्फाद्रिष्फं स्वक्षयं भ्रंशमेव॥"

इत्यादि जातकविषये मूर्तिरमत्रं भक्ष्यं भोज्यं भोजयितृभावमुपदंशसेचनमन्नं सहभुक्पूर्तिकथाशयनमपि लग्नादिति। भोजनप्रश्नविषये लग्नाद्याः स्युर्भावमूर्तिः कोशो योधो वाहो मन्त्रो शत्रुर्मार्गोऽथायुः स्वान्तं व्यापारश्च प्राप्त्यमाप्तिरिति प्रभुविषये इत्यादि शास्त्रादवगन्तव्यम्। एषां भावानामधिपतिशुभयोगदृष्टिवशाद्वृद्धिः, पापशत्रुयोगदृष्टिवशाद्धानिः। तथा चोक्तम्—

"योयो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्यतस्यास्ति वृद्धिः।
पापैरेवं तस्य भावस्य हानिर्निर्देष्टव्या पृच्छतां जन्मतो वा॥" इति।

उत्तरत्राचार्यः स्वयमेव वक्ष्यति—

"लग्नात्पुत्रकलत्रभे शुभपतिप्राप्तेऽथवालोकिते।
चन्द्राद्वा यदि सम्पदस्ति हि तयोर्ज्ञेयोऽन्यथाऽसम्भवः॥" इति।

अत्र चन्द्राद्वेति विकल्पाच्चन्द्रादपि द्वादशभावाश्चिन्त्या इत्युक्तं भवति तयोर्बलाधिकादिति सिद्धं भवति ॥ १६ ॥

(त्रोटकम्)

कण्टककेन्द्रचतुष्टयसंज्ञाः सप्तमलग्नचतुर्थखभानाम् ।
तेषु यथाभिहितेषु बलाढ्याः कीटनरांबुचराःपशवश्च ॥ १७ ॥

पुनर्लग्नादीनां नामान्तराण्याह प्रकारान्तरेण—कण्टककेन्द्रचतुष्टयमिति तिस्रः संज्ञा भवन्ति । अत्र लग्नादीनामुभयत्र संज्ञानिर्देशेन लग्नादिभावानां तत्तत्संज्ञाविषयफलं प्रत्येकं संज्ञान्तरानपेक्षतया स्वातंत्र्यं द्योत्यते । यस्य पुरुषस्य जातकं निरूप्यते तस्य साक्षात्सम्बन्धिनः कल्पादयो भावाः परम्परासम्बन्धिनस्तन्वादय इति विशेषद्योतनाय पृथङ्निर्देशः कृतः । तद्यथा । कल्पः स्वस्थः "वार्तो निरामयः कल्प उल्लाघो निर्गतो गदात् इत्यमरः । रोगारोग्यसुखदुःखाद्यनुभवकृदन्तरात्मा कल्पः सः प्रथमभावः । स्वमात्मनो वसनाशनादिसम्पादकं धनं स द्वितीयभावः । तृतीयो विक्रमः 'विक्रमस्त्वतिशक्तिता' इत्यमरः । चतुर्थो गृहम्, आत्मनो भोजनाशनशयनाधिकरणं मन्दिरम् । पञ्चमः प्रतिभा, तत्तदुचितकार्याकार्यविशेषप्रतिभानुष्ठानम् । षष्ठभावः क्षतं, वातपित्तादिनिमित्तोऽभिघातपतनादिनिमित्तो निजागन्तुकभेदाद्द्विविधो व्रणः । सप्तमभावश्चित्तोत्थः, वनिताभोगादिविशेषः । अष्टमो रन्ध्रम्, आधिव्याध्याद्यनिष्टागमः । नवमो गुरुः, ऐहिकपारत्रिकसुखोपायोपदेष्टा । दशमभावो मानः, मानश्चित्तसमुन्नतिः । एकादशो भावः अर्थागमः । द्वादशो व्यय इति यावत् । एते भावा आत्मनः सम्बन्धिनः । तन्वादयस्तु परम्परया सम्बन्धिनस्तत्र पितृमातृशुक्रशोणितोद्भवस्त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्रस्वरूपः क्रिया देहस्तत्रात्मनः काष्ठाग्निवत्सम्बन्धः प्रसिद्धः प्रथमभावः । द्वितीयभावः कुटुम्बः, वसनाशनादिप्रदानेन भरणीयो वर्गः । तृतीयो भ्राता, समानोदरः सहोत्थशब्देन भ्रातृसदृशा वयस्यादयो गृह्यन्ते । चतुर्थो बन्धुः, मातुलपितृव्यादयः । पंचमः पुत्रः । षष्ठः शत्रुः । सप्तमः पत्नी । अष्टमो मरणं, प्राणवियोगावस्था । नवमः शुभं धर्मः । दशम आस्पद, शत्रुभिरपरिभवनीयं स्थानम् । एकादशद्वादशाभ्यामायव्ययौ । येषां तन्वादीनां परम्परास्वकीयत्वेन सम्बन्धः । एवं परम्परासम्बन्धवन्तोऽन्येपि भावाः शास्त्रान्तरोक्ताभिराभितन्वादिभिः साधर्म्येणोपलक्ष्यंते । तथा हि—

"लग्नाद्याः स्युर्भावा मूर्तिः कोशायोधोवाहोमन्त्रः ।
शत्रुर्मार्गोऽथायुः स्वान्तधर्मो व्यापारश्च प्राप्त्यप्राप्तिः ॥"

मूर्तिरमत्रमित्रियादि। तनुशब्देनात्मशरीरार्थोऽथायुः स्वादष्टस्थानमान-सम्बन्धासम्बन्धतत्स्थानदृष्टिनययोजलात्सप्तमश्च लक्षिताः राशीनां बलाबल-निरूपणप्रकारमाहोत्तरार्द्धेन–यथाविहितेषु सप्तमलग्नचतुर्थखभेषु कीटनराम्बुचराः पशवश्च बलाढ्या भवन्ति। सप्तमे कीटराशिर्बलवान्। लग्ने नरराशिः। चतुर्थे जलराशिः। दशमे चतुष्पद्राशिरित्युक्तं भवति, तदन्तरेऽनुपातः। तत्प्रकारस्तु–कीटराशिभ्यः उदयलग्नं विशोध्य, चतुष्पदराशिभ्यो चतुर्थलग्नं विशोध्य, नरराशिभ्योऽस्तं लग्नं विशोध्य, जलराशिभ्यो मध्यमलग्नं विशोध्य बलहीना इति च सिद्धं भवति। तदन्तरेऽनुपातः। तत्प्रकारस्तु चतुष्पाद्राशिभ्यः पातालग्नं विशोध्य षड्राश्यधिके चक्राद्विशोध्य भागीकृत्य त्रिभिर्भजेल्लब्धं षष्ट्यंशभूतं बलं भवति। तथाच पाराशरमुनिः–

"नृयुग्मजूकपाथोनमृगचापार्द्धकुम्भभात्।
मृगचापपरार्द्धाख्यमेषसिंहवृषादपि॥
अलिकर्कटकाच्चापि मृगपूर्वार्द्धमीनभात्।
अस्तं सुखं क्रमाल्लग्नं खं हित्वाङ्गादिके सति॥
चक्राद्विशोध्य रामैश्च भक्ता भागीकृतं बलम्।" इति।

एवं केन्द्रबलमानीयैकत्र संरक्षयेत्॥ १७॥

(वसन्ततिलका)

केन्द्रात्परं पणफरं परतस्तुसर्व–
मापोक्लिमं हिबुकमंबु सुखं च वेश्म।
जामित्रमस्तभवनं सुतभं त्रिकोणं
मेषूरणं दशममत्र च कर्म विंद्यात्॥ १८॥

केन्द्रान्तरालराशीनां संज्ञामाह–केन्द्रात्परं पणफरं भवति केन्द्रस्यानन्तरो राशिः पणफरसंज्ञः तद्वत्परमापोक्लिमं भवति पणफरात्परो राशिरापोक्लिमसंज्ञ इत्यर्थः। केषांचिद्भवनानां प्रसिद्धानि संज्ञान्तराण्याह–वेश्मराशिः हिबुकमंबु सुखं च भवति। अस्तभवनं जामित्रं भवति। सुतभं त्रिकोणं भवति। दशमं मेषूरणं भवति। अत्र कर्म च विंद्यादशमे कर्मेति संज्ञामपि विन्द्यात्।

गोविन्दः–अथ पणफरादिसंज्ञामाह–केन्द्रादित्यादिना। केन्द्रात्परं स्थानं पणफरं द्वितीयपंचमाष्टमैकादशस्थानानि पणफरसंज्ञानि। ततः परं तृतीयषष्ठनवम-द्वादशस्थानान्यापोक्लिमसंज्ञितानि। केन्द्रपणफरापोक्लिमस्थैर्ग्रहैर्बाल्ययौवनवार्द्ध-कावस्थासु फलं वाच्यम्। तथा च सारावल्याम्–

"केन्द्रात्परं पणफरमापोक्लिमसंज्ञितं तयोः परतः ।
बालयुवस्थविरत्वे भवन्ति फलदा ग्रहास्तेषु ॥" इति ।

हिबुकमम्बु सुखं च वेश्म चतुर्थस्थानसंज्ञा । जामित्रमस्तभवनम् । पुत्रस्थानं पंचमम् । मेषूरणं दशमम् । दशमे पुरुषस्य प्रवृत्तिं विद्यात् । केन्द्रेष्वन्योन्यं चिन्त्यानि । तथा शास्त्रान्तरे-

"हृदयं ग्रहं च हिबुके मध्याह्ने स्थानमानकोशज्ञाः ।
आत्मार्थजीवितान्यखिलश्रेयश्च नष्टजातकाय ॥
प्रवासपरिदेवनानि जामित्रे मृतरोगतापचिन्ता ।"

तथा प्रवासश्च विज्ञेयाः । चंक्रमणासनमरुंधनास्थितिरित्युदयास्ताहिबुकमध्यलग्नेषु ।

"च्युतिर्विलग्नाद्धिबुकाच्च वृद्धिर्मध्यात्प्रवासोऽस्तमयान्निवृत्तिः ।"
हिबुकेनाधः सलिलं नद्या गमनं च सप्तमेनैव ।
दशमेन वृष्टिपतनं ब्रूयादुदयेन तत्रितयम् ॥" इत्यादि ।
प्रश्नजातकेषु विषयविभागं विमृश्य निरूपणीयम् ॥ १८ ॥

(शार्दूलविक्रीडितम्)

होरा स्वामिगुरुज्ञवीक्षितयुता नान्यैस्तु वीर्योत्कटा
केंद्रस्था द्विपदादयोऽह्नि निशि च प्राप्ते च संध्याद्वये ।
पूर्वार्द्धे विषयादयः कृतगुणा मानं प्रतीपं च त-
दुश्चिक्यं सहजं तपश्च नवमं त्र्याद्यं त्रिकोणं च तत् ॥ १९ ॥

होरालग्नबलमाह-स्वामिगुरुज्ञवीक्षितयुता होरा वीर्योत्कटा भवति । स्वामिना, गुरुणा, बुधेन वीक्षिता युता होरा वीर्योत्कटेति शेषः । अतएव पणफरस्था मध्यबलाः । आपोक्लिमस्था हीनबला इति च द्रष्टव्यम् । तथा च बादरायणः-

केन्द्रस्थाः स्युरतिबलाः पणफराश्रिता मध्यबला ज्ञेयाः ।
आपोक्लिमगताः सर्वे हीनबला राशयः कथिताः ॥" इति ।

द्विपदादय अह्नि निशि च सन्ध्याद्वये च प्राप्ते वीर्योत्कटा भवन्ति । द्विपाद्राशयः अह्नि । चतुष्पाद्राशयो रात्रौ । कीटराशयः पूर्वसन्ध्यायामपरसन्ध्यायां च वीर्योत्कटा भवन्तीत्यर्थः । पूर्वार्द्धे मेषादिके विषयादयः पंचषट्सप्ताष्टनवदश च संख्याः कृतगुणाश्चतुर्गुणाः मानं राशिप्रमाणं भवतीति शेषः तत उत्तरार्द्धे तुलादिषट्के प्रतीपं प्रतिलोमेन दशादयो विषयान्ताः संख्याश्चतुर्गुणा प्रमाणं भवति । ह्रस्वदीर्घादिपरिज्ञानेनास्य प्रमाणस्योपयोगः । सहजं दुश्चिक्यं भवति । नवमं तपश्च भवति इति शेषः । तत्र्याद्यं त्रिकोणं च नवमस्य त्रित्रिकोणसंज्ञाप्यस्तीति यावत् ।

गोविन्दः-होरा स्वामीत्यनेन दृष्टिबलमुदयबलं स्थानबलं कालबलं चोच्यते। होराराशिः स्वामिना गुरुणा ज्ञेन वा वीक्षितो दृष्टो बलयुतो भवत्युत उदयबलयुतो भवति। तद्बलानयनमत्र मयोच्यते-'होराफलं लग्नपतेः समानम्' इत्यध्याये वक्ष्यति ततो बलवशात्फलनियम इति न्यायाद्राश्यधिपतेर्बलं गणितेनानीय तद्राशिं प्रति शुभदृष्टिरस्ति चेत्तद्दृष्टिचतुर्थांशषष्ठांशरूपेण षष्ट्यंशरूपे स्वामिबले योजयेत्। पापदृष्टिचतुर्थांशं वर्जयेत्। स्वस्वामिगुरुबुधदृष्टिरस्ति चेत्त दृष्टिं च योजयेत्। बुधगुरुभ्यां योगे पूर्णमेकं बलं स्वामिबले योजयेत्। मन्दभौमरविभिर्युक्तस्य पूर्णमेकं बलं शोधयेत्। एकैकस्य त्रिभिर्युगपद्युक्तस्य पूर्णं बलत्रयमुपनयेत्। पूर्णशब्देन षष्ट्यंशानां षष्टिरुच्यते। चन्द्रशुक्रयोगे बलहानिवृद्धी नो भवतः। नान्यैश्चेत्यत्रान्यशब्देन पापग्रहा गृह्यन्ते। अत्र पराशरमुनिराह-

"शुभदृष्टिचतुर्थांशयुतश्च ज्ञेज्यदृग्युतः।
हीनः पापदृगब्ध्यंशयुतं स्वामिबलं बलम्॥
गुरुज्ञाभ्यान्तु युक्तस्य पूर्णमेकन्तु योजयेत्।
मन्दाररवियुक्तस्य बलमेकेन वर्जितम्॥" इति।

केन्द्रस्था द्विपदादय इत्यत्र लग्नदशमसप्तमचतुर्थभावेषु नरचतुष्पात्कीटाम्बुचरराशयो बलवन्त इति सूचितम्। तत्पूर्वमेव तेषु यथाविहितेषु बलाढ्या इत्यनेनोक्तं तादिदानीं पुनर्वचनमिति चेन्न, इदं प्रश्ने ज्ञेयम्। नात्र त्रैराशिकन्यायः, पूर्वोक्तं जातकविषयम्। पुनःकेन्द्रस्था इत्यत्र केन्द्रस्था इति अभिप्रायोऽस्ति केन्द्रगताः सर्वे राशयो बलवन्तः। पणफरस्था मध्यबलाः। आपोक्लिमस्था हीनबला इत्यर्थः। केन्द्रगतानां राशीनां षष्ट्यंशानां षष्टिं योजयेत्। पणफरगतानां त्रिंशदापोक्लिमस्थानां पञ्चदशैवमानीतं राशिबलं स्वामिनो बलादेकाकारं चेद्राशिः पूर्णबलः। तथा च पराशरमुनिः-'राशीनां स्वामिनो बलादधिकं पूर्णमेकं तद्बलं चेद्बलिनो मताः' इति। गतयवनेश्वरश्चाह-

"बलानि सप्त चेद्भावाः पूर्णवीर्याः प्रकीर्तिताः।"

अत्र गोऽजाश्वीत्यादिराशीनां दिननिशासंज्ञाविधाने 'शीर्षोदया दिनबलाश्च भवन्ति शेषाः' इत्यत्र बलं गृहाण तत्र दिनराशयो दिने बलिनः। निशाराशयो निशायां बलिनः इति कथयन्ति। अत्र राशिबलानयने बुधजीवरहितशुभदृष्टे चतुर्थांशयोजनं न वराहमिहिराचार्यस्याभिप्रेतम्। 'होरा स्वामिगुरुज्ञवीक्षितयुता नान्यैश्च' इत्युक्तत्वात्। 'द्विपदादयोऽह्नि निशि च प्राप्ते च सन्ध्याद्वये' इत्यत्र द्विपदचतुष्पदादीनि निशायामुदयराश्यस्तमे राशयो बलवन्त इत्युक्तमत्र कीटशब्देन वृश्चिककुलीरमीनमकरान्त्यार्द्ध इत्यादिबलमुक्त्वा राशीनां मानं कथयन्ति पूर्वार्द्धे

इत्यादीनां पूर्वार्द्धशब्देन मेषवृषमिथुनमीनकुम्भमकराश्चोच्यन्ते । कृतगुणा विषयादयो मानम् । द्वादशराश्यात्मकस्य चक्रस्यैकपरिभ्रमणकालः खल्वहोरात्रस्ततः एकैकराशेः पंचपंच नाडिका उदेतुं कालः कल्पनीयः । तथा न जायते राशिचक्रस्य तिर्यग्भ्रमणवशात् पंचनाडिकाभ्य ऊनो वा राश्युदयकालः । विषयादयः पंचदश इत्येताः कृतगुणाः कृतजीवा येषां कालज्यामानयेदित्यर्थः । षष्टिगुणिताः पंचगुणिता नाडिकास्त्रिशती सा षड्गुणिता सहस्राहिका शतसंख्या प्रमाणमानोदय इत्यक्षरसंख्यया संपरोत्तरेण हत्वा स्वस्वाहोरात्रेण विभज्यावाप्तफलं चापत्रयं विन्यस्य द्वितीयं तृतीयं शोधयित्वा शिष्टद्वयं प्रथमचापं च मिथुनवृषात्र विन्यस्य द्वितीयं तृतीयं शोधयित्वा शिष्टमिथुनवृषमेषाणां मीनकुंभमकराणां च लङ्कोदयप्रमाणाः । मेषवृषमिथुनानां प्रतीपवृत्त्या कर्कसिंहकन्यकानामुदयप्राणा भवन्ति । मीनकुंभमकराणां प्रतीपवृत्त्या धनुर्वृश्चिकतुलानामुदयप्राणा भवन्ति । तत्र भास्करेणोक्तम्-

"शशिकृतनगरामैराहता राशिजीवाः स्वकदिवसग्रहार्द्धे भाजिताः कांक्षिताश्च । भवंति समतिरिक्ताः पूर्वपापैरजाद्यैर्विषुवदुदयराशिप्राणपिण्डाः क्रियाद्यात् ॥"

लंकोदयप्राणाः भूमेर्गोलाकृतित्वात्स्वदेशोदयत्व सम्पादनाय स्वदेशचराः संस्कृताः स्वदेशराश्युदया भवन्ति । ततोऽप्युक्तं भास्करेण-

"शून्यादिरसरूपाग्नि भूतरन्ध्रमुनीन्दवः ।
पंचाग्निरन्ध्रशशिनो मेषादीनां निरक्षजाः ॥
चरप्राणाः क्रमाच्छोध्या दीयन्तेऽप्युत्क्रमेण ते ।
स्वदेशभोदयामेषे व्यत्ययं च तुलादितः ॥" इति ।

एतत्सर्वं गोलसिद्धत्वान्नोक्तम् । दुश्चिक्यं सहजं भवति । तपः नवमः त्रित्रिकोणं च अन्यदर्थांतरं सूच्यते । तृतीयराशिप्रमाणं नवमराशेः लङ्कोदयप्रमाणमिति । अन्यच्च व्यज्यते नवमस्थानं विशेषमिति चिन्त्यते इत्युक्तं च-'सर्वमपहाय चिन्त्यं भाग्यर्क्षं तु विशेषेण इति ॥ १९ ॥

(मन्दाक्रांता)

रक्तः श्वेतः शुकतनुनिभः पाटलो धूम्रपाण्डु-
श्चित्रः कृष्णः कनकसदृशः पिंगलः कर्बुरश्च ।
बभ्रुः स्वच्छः प्रथमभवनाद्येषु वर्णाप्लवत्वम्
स्वाम्याशाख्यं दिनकरयुताद्भाद्द्वितीयं च वेशि ॥ २० ॥

इति श्रीमदावन्तिकाचार्यद्विजवराहमिहिरकृते बृहज्जातके राशिभेदाऽध्यायःप्रथमः ॥ १ ॥

राशीनां वर्णानाह–मेषो रक्तः । वृषः श्वेतः । मिथुनः शुकतनुनिभः हरित इत्यर्थः। प्रथमभवनाद्येषु मेषादिराशिषु वर्णाः रक्तादयः इति सम्बन्धः । प्लवत्वं दिक्प्रवहत्वम् । स्वेशाशाख्यं राशीश्वरदिगाख्यं गृहदिशः प्रागाद्या इति वक्ष्यन्ते । ततो मेषराशिर्दक्षिणप्लव इत्यादि । दिनकरयुताद्राद्वितीयं वेशिसंज्ञं च भवति । एवं राशीनां निसर्गभवा, ग्रहभवा, समयभवाश्च विशेषतयोक्ताः ।

गोविन्दः राशिवर्णानाह–रक्तः श्वेत इति । मेषाद्येषु राशिषु वर्णा भवन्ति ग्रहरहिते राशीनां वर्णसिद्धिः फलवत्त्वं स्वेशाशाख्यं स्वाधिपतिदिक्प्लवो राशिरिति । स्वजन्मलग्नराशिः, प्रश्नलग्नराशिर्वा यद्दिक्प्लवो भवति तां दिशं गतो राजा चिरेण रिपुं जयति । तथा च सारावल्याम्–'भावाधिपतिदिशीह प्लव' इति । यवनैः "प्रयत्नतस्तत्प्लवगा निहन्याच्चिरेण महीपतिः शत्रुम्" इति । दिनकरयुताद्राद्वितीयं वेशि । द्वादशं वा वेशीति चकारेण सूच्यते । पूर्ववर्णप्रयोजनं तु "जन्मोदयगृहे वर्णास्तदाधिपतेः पूजिता गृहे प्रतिमा । हन्ति हरेरिह शत्रूनिन्द्रधनुर्ध्वजिनीपतिर्देवरिपूनिति ॥ २० ॥

इति होराशास्त्रे बृहज्जातकस्य दशाध्यायिटीकायां प्रथमोऽध्यायः ॥ १ ॥

अथ ग्रहयोनिभेदाध्यायः ।

(शार्दूलविक्रीडितम्)

कालात्मा दिनकृन्मनस्तुहिनगुः सत्त्वं कुजो ज्ञो वचो
जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजः ।
राजानौ रविशीतगू क्षितिसुतो नेता कुमारो बुधः
सूरिर्दानवपूजितश्च सचिवौ प्रेष्यः सहस्रांशुजः ॥ १ ॥

पूर्वोक्तस्य मेषादिराश्यवयवनिष्पन्नस्य होरापुरुषस्य सूर्यादिग्रहैः सम्बन्ध उच्यते–कालपुरुषस्यात्मा दिनकृत् । तस्य मनश्चन्द्रः सम्पदामपि कारकः । सत्त्वं कुजः । बुधो वचः । जीवो ज्ञानसुखे । मदनः शुक्रः । दुःखं दिनेशात्मजः । इत्यात्मादिभूतेषु ग्रहेषु बलवत्सु जातस्य पुरुषस्यात्मादयो बलिनो भवन्ति । दुर्बलेषु दुर्बला भवन्ति । आत्मभूतस्य दिनकृतो बलवत्त्वे तस्यात्मप्रभावो जायते आत्मप्रभावादेव हि सर्वकार्यपौरुषसिद्धिस्तस्मादादित्यबलमपि विशेषतश्चिन्त्यम् । मनोभूतस्य चन्द्रस्य बलवतो मनःप्रभावो जायते । मनःप्रभावादेव हि सर्वकार्यसिद्धिस्तस्माच्चन्द्रबलमपि विशेषाच्चिन्त्यम् । आत्ममनसोरितरेतराश्रयत्वात्सूर्याचन्द्रमसोरेकस्य बलवशादितरस्य बलसिद्धिः तथा च संहितायाम्–

"आत्मा सहैति मनसा मन इन्द्रियेण
स्वार्थेन चेन्द्रियगणक्रम एवमेषः ।
योगो यथैव मनसः किमगम्यमस्ति
यस्मिन्मनो व्रजति तत्र गतो यदात्मा ॥" इति ।

आत्मवियोगे मनसो जाड्यं प्रसज्जते तस्मादर्केन्द्वोर्बलं सर्वत्र चिन्त्यम् । तथा चोक्तम्-

"सविता दशाफलानां वाचयिता चन्द्रमाः प्रबोधयिता ।
सर्वेतरग्रहाणां ज्ञेयाः ॥" इति ।

कोर्भूमेर्जातः कुजः कुजशब्देन स्थिरत्वं सूचितम् । ज्ञशब्देन ज्ञानरूपत्वं बुधस्य सूचितम् । जीवशब्देन गुरोर्जीवाधिपत्यं सूचितम् । ज्ञानसुखे च जीवः, ज्ञानशब्देन बुद्धिरप्युच्यते । बुद्ध्या खलु सर्वं जानाति पुरुषः । सुखशब्देन धनमपि गृह्यते धनस्य सुखपरमसाधनत्वात्सुखशब्देन पुनरपरमप्युच्यते । तथा चोक्तमन्यत्र-

"पुत्रजन्मविपत्तिभ्यां न परं सुखदुःखयोः ।" इति ।

तस्माद्देहारोग्यवित्तपुत्रबुद्ध्यादिस्वरूपो जीवः । तथा चोक्तम्-

"गुरुणा देहपुष्टिः स्याद्बुद्धिपुत्रार्थसम्पदः ।" इति ।

सितश्च मदनस्तत्र चशब्देन सितस्य विज्ञानसुखस्वरूपत्वं सूचितमयं तु विशेषः सङ्गीतसाहित्यादिज्ञानं शुक्रस्य । वेदादिज्ञानं जीवस्य । सुखमपि तद्वत्, सात्त्विकसुखं जीवस्य राजससुखं सितस्य । गुरुसितयोः सत्त्वरजोमयत्वान्मदनशब्देन सुरभिद्रव्यहृद्यान्ननवांबरभार्याविवाहकर्मभोगस्थानवाहनशीतकलादयो गृह्यन्ते । दुःखं दिनेशात्मज इति अत्र दुःखशब्देन शवाशौचदीक्षाबन्धुनाशव्याधिमरणविपदउच्यन्ते । तथा चोक्तम्-

"संवादो गुरुसंयोगे शशियोगे विपद्भयम् ।
चिन्तितव्याः सदा पुंसां सर्वे भावानुसारतः ॥" इति ।

अत्र दिनकृदादयो वारक्रमेण कथितास्तेन किंचित्प्रयोजनं विद्यते दिनयामाधिपत्यविज्ञानम् । तथा चोक्तम्-

"ग्रहा वारनाथादयो वासरस्य प्रमाणाष्टभागाधिनाथाः क्रमेण ।
सुयामाधिपत्यं च तत्पंचमाद्या य आद्यंशनाथः स एवाष्टमस्य ॥" इति ।

दिनेशात्मज इति । दिनेशशब्देनांत्यांशस्य वारेशाधिपत्यमुक्तं दुःखस्वरूपस्य शनेर्यामात्मना विद्यमानस्य गुलिकस्यापि दुःखमयत्वं सूचितम् । कालात्मा दिनकृदित्यादिना जातस्य जन्तोः शरीरावस्था सूचिता।प्रथममात्मानुप्रवेशस्ततो मनसः प्रादुर्भावस्ततः सत्त्वमयाहंबुद्ध्युद्भवस्ततो मदनविकाराद्विषयसंगतिस्ततो वार्द्धका-

वस्थायां क्षीणो भूत्वा दुःखितो भवतीत्यादि। अत्र रविचन्द्रयोर्वियोगयोगवशात्तिथयो नित्ययोगाश्चोत्पद्यन्ते।

नक्षत्राणि तु चन्द्रस्य नक्षत्रप्रवेशात्तस्माद्रविचन्द्रवशाद्धि नक्षत्रतिथिकरणसंभवस्तस्मात्कालस्यात्ममनोमयत्वमनयोरुक्तम्।

कालात्मा दिनकृदिति। कालस्वरूपो हि रविरित्युक्तस्तथा हि रविगतिवशादपममण्डलकल्पना दिवसकल्पना चापममण्डलस्थद्वादशराश्युदयवशादहोरात्रसिद्धिः त्रिंशदहोरात्रैर्मासः। मासद्वयेनर्तुः। षड्भिः ऋतुभिः संवत्सरः। इत्यादि कालविभागकल्पनया हि लवादिप्रलयान्तः कालो निष्पद्यते। तस्मात्कालात्मा दिनकृद्भवति। मनस्तुहिनगुरिति–पुरुषस्य मनःप्राधान्येन हि सर्वप्रवृत्तिर्दृश्यते चन्द्रबलक्षये अन्यग्रहबलेन किंचित्प्रयोजनं विद्यते। तथा चोक्तम्–

"अमृतकिरणवीर्याद्वीर्यमाश्रित्य सर्वे
विदधति फलमेते खेचराः साध्वसाधु।
निजनिजविषयेषु व्याप्रियन्ते यथामू–
न्यलमिह मनसैवाधिष्ठितानीन्द्रियाणि॥" इति।

तस्माच्चंद्रार्कयोर्बलं विशेषतश्चिन्त्यमित्युक्तं भवति। तथा चोक्तम्–

"चन्द्रार्कौ बलयुक्तौ कुजादयः प्रोक्तमार्गबलहीनाः।
हीनाः शुभबलमास्ते सर्वे दशासु योगेषु संचिन्त्याः॥" इति।

राजानौ रविशीतगविति। रविचन्द्रौ राजानौ। क्षितिजः सेनापतिः। कुमारो युवराजा बुधः। गुरुशुक्रौ सचिवौ। प्रेष्यः शनिः। तथा च सारावल्याम्–

"राजा रविः शशधरश्च बुधः कुमारः
सेनापतिः क्षितिसुतः सचिवौ सितेज्यौ।
प्रेष्यस्तयोश्च रविजः सबला नराणां
कुर्वन्ति जन्मसमये निजमेव रूपम्॥" इति।

जन्मकाले यो ग्रहो बलवाञ्जातस्तत्समानरूपो भवतीत्यन्यदर्थान्तरमस्तीत्येव सूचितम्। द्वादशराश्यात्मकस्य कालचक्रस्य राजानौ रविशीतगू अधिपती इत्यर्थः। दिनपतिर्निशापतिश्च द्वादशराशीनामधिपौ। तत्र रविः स्वस्थानात्सिंहादारभ्य क्रमात् षड्राश्यधिपतिः ततश्चन्द्रः स्वस्थानात्कुलीरादारभ्य उत्क्रमेण षड्राश्यधिपतिः। रविचन्द्राभ्यां दत्तमेव कुजादीनां राश्याधिपत्यम्। तद्यथा–कुमारभूतस्य बुधस्य रविणा स्वस्थानाद्धनस्थानं दत्तम्। सचिवभूतस्य शुक्रस्य पराक्रमस्थानं दत्तम्। सेनापतिभूतस्य कुजस्य वाहनस्थानं दत्तम्। गुरोर्बुद्धिस्थानं पंचमं दत्तम्। प्रेष्यस्य शनेः प्रेष्यस्थानं षष्ठं दत्तम्। एवं चन्द्रेण व्युत्क्रमगणनया धनादीनि स्थानानि दत्तानीति। तथा च सारावल्याम्–

"द्वादशमण्डलभगणस्तस्यार्द्धे सिंहतो रविर्नाथः ।
कर्कटकात्प्रतिलोमाच्छशभृदथान्येऽपि तत्स्थानात् ॥ "
भानोरर्थे विहगाः शूरास्तेजस्विनश्च साहसिकाः ।
शशिनो मृदुश्च सौम्याः सौभाग्ययुताः प्रजायन्ते ॥ " इति ॥ १ ॥

(शालिनी)

हेलिः सूर्यश्चंद्रमाः शीतरश्मि-
र्हेम्नोविद् ज्ञो बोधनश्चेन्दुपुत्रः ।
आरो वक्रः क्रूरदृक्चावनेयः
कोणो मंदःसूर्यपुत्रोऽसितश्च ॥२॥

(वसन्ततिलका)

जीवोऽङ्गिराः सुरगुरुर्वचसांपतीज्यो
शुक्रोभृगुर्भृगुसुतः सित आस्फुजिच्च ।
राहुस्तमोगुरसुरश्च शिखी च केतुः
पर्यायमन्यमुपलभ्य वदेच्च लोकात् ॥ ३ ॥

सूर्यचन्द्रयोर्द्वे द्वे संज्ञे प्रोक्ते, अन्याः संज्ञा लोकतो वेद्याः । लोकप्रसिद्धत्वात्प्रथममुक्तौ प्रकाशकग्रहौ, पुनरुक्ताः पञ्चताराग्रहाः तदनन्तरमुक्तौ द्वौ यौ तमोग्रहौ । प्रथमोदितौ सूर्येन्दू सर्वसाधारणौ सर्वनिरूपणीयौ ॥ बुधोऽप्याश्रयवशात्सुखदुःखदो ज्ञेयस्तदनन्तरोदितौ कुजशनी ह्यनिष्टदौ सर्वत्र । तदनन्तरोदितौ राहुकेतू क्षेत्रोच्चादिहीनत्वादशुभफलदाविति । 'पर्यायमन्यदुपलभ्य वदेच्च लोकात्' इति विधिर्न केवलमस्मिन् शास्त्रे यः पर्यायोऽत्र नोक्तः स लोकाच्छास्त्रेषु दर्शनाज्ज्ञात्वा वदेत् । अत्रानुक्तानि यानि लक्षणानि तानि न निरूपणीयानि इति नावगन्तव्यम् । तानि ज्ञात्वा सर्वं वदेदित्युक्तम् । बुधजीवशुक्राणां चत्वारिचत्वारि नामान्युक्तानि । मन्दारयोस्त्रीणि त्रीणि । राहोस्त्रयः तमः अगुः असुरश्चेति । केतोश्चैकं शिखीति ॥२॥

(शालिनी)

रक्तः श्यामो भास्करो गौर इन्दु-
र्नात्युच्चाङ्गो रक्तगौरश्च वक्रः ।
दूर्वाश्यामो ज्ञो गुरुर्गौरगात्रः
श्यामः शुक्रो भास्करिः कृष्णदेहः ॥ ४ ॥

ग्रहाणां वर्णा उक्ताः । किमस्य प्रयोजनमिति चेद्यस्मिन् ग्रहे बलवति जातस्तदानीं तत्तुल्यो वर्णो भवति ।तथा च कृष्णीये–

"आत्माकृतिवर्णादि ग्रहस्तु न जहाति चरगृहस्थोऽपि ।
तत्स्वाम्याकृतिवर्णो जातस्येत्यपरे व्यवस्यन्ति ॥" इति ।

'चन्द्रसमेतनवांशपवर्णः' इत्यत्रायं गृह्यत्वे–उच्चगो रक्तः, नीचगः श्यामः रविर्भवति । नात्युच्चाङ्गः त्र्यस्र इत्यर्थः । गौरगात्रः धवलगात्रः गौरावयवः इत्युक्तम् । भास्करेः कृष्णदेहः अन्तः स्वच्छ इत्यर्थः ॥ इति ॥ ४ ॥

(शार्दूलविक्रीडितम्)

वर्णास्ताम्रसितातिरक्तहरितव्यापीतचित्रासिता
वह्न्यम्ब्वग्निजकेशवेन्द्रशचिकाः सूर्यादिनाथाः क्रमात् ।
प्रागाद्या रविशुक्रलोहिततमः सौरेंदुवित्सूरयः
क्षीणेंद्वर्कमहीसुतार्कतनयाः पापा बुधस्तैर्युतः ॥ ५ ॥

एवं ग्रहाणां निजशरीरवर्णानुक्त्वा तदधिदैवतान्वर्णानाह–ताम्रादयो वर्णाः सूर्यादिनाथाः सूर्यादयो नाथा येषां ते तथोक्ताः अनेन ग्रहपूजादौ तद्वर्णकुसुमवस्त्रपश्वादयः शक्यन्ते । पदार्थानामसंख्यत्वात्पदार्थस्य प्रथमं साक्षात्कथनं दुष्करं स्यात् । वह्न्यम्ब्वित्यादि–वह्न्यम्ब्वग्निजकेशवेन्द्रशचिकाः सूर्यादिनाथा भवन्ति । सूर्यादिनाथा इत्यत्र षष्ठीतत्पुरुषसमासः । अत्र वह्निशब्देनाग्निश्च रुद्रश्च विवक्षितौ, कृशानुरेता हि भगवान्हरः । अम्बुशब्देनापरः सूचितः । शब्दैकदेशकथनादंबिका गौरी च । अग्निजशब्देन स्कन्द उच्यते । कुण्डाश्रयत्वादग्नेरधिष्ठानभूता भूमिश्च । केशवशब्देन विष्णुरेव विवक्षितः । इन्द्रशब्देन शक्रः ब्रह्मा वा देवानामाश्रयभूतत्वात् । शचीशब्देनेन्द्राणी इन्द्रो वा । कशब्देन ब्रह्मा गृह्यते ।शब्दैकदेशेन कालो वेत्युक्तार्थानुसारेण–शास्त्रान्तरे पक्षद्वयत्वेनोक्तम् । तथा च शास्त्रान्तरे–

"सूर्यादितः शिवशिवागुहकेशवेन्द्रकालाः क्रमेण पतयः कथिताः सुधीभिः ।
वह्न्यम्बुभूमिहरिशक्रशचीसुरेन्द्रास्तेषां पुनर्मुनिपरैः प्रतिदेवताश्च ॥"

द्वितीयपक्षानुसारेण पतयोऽत्र सुगमाः । तथा च सारावल्याम्–

"पावकजलगुहकेशवशक्रशचीवेधसः पतयः ।
पूर्वादिग्रहदैवतमत्रः सम्पूज्य देवतामाशाम् ॥
कनकगजवाहनादीन् प्राप्नोति भूपतिः शीघ्रम् ।" इति ।

प्रागाद्या इति । प्रागादिदिङ्नाथाः सूर्यादयो भवन्ति । एते जातकविषयाः । अथ पक्षान्तरम् । रवेः प्राची । शुक्रस्य प्रतीची । लोहितस्याग्नेयी । तमसः ऐशानी ।

सौरेर्वायवी । इन्द्वोश्चन्द्रस्योदीची । बुधस्य नैर्ऋती । सूरेरवाचीति अयमुपदेशगम्यः । केशरीभागशेषो ह्ययं पक्षो नष्टमुष्टयादिषु ग्राह्यः । तथा च कृष्णीये-

"रविकुजसुरगुरुशशिसुतभृगुसुतसौरेन्दुसैंहिकेयानाम् ।
प्रादक्षिण्येन दिशः प्राच्याद्याः कल्पिताश्चान्यैः ॥" इति ।

एवं द्विविधग्रहदिक्कथने यां दिशं प्रति ग्रहो गच्छति सा तस्य दिगित्युपदेशः । क्षीणेन्द्वित्यादि । क्षीणेन्द्वादीनामुत्तरोत्तरं पापफलसूचकत्वमवगन्तव्यम् । अनेन प्रयोजनं तु शुभग्रहैः पापग्रहैश्च बलयुतैःफलभेद उच्यते । रविकुजसौराः निसर्गतः पापाः । चन्द्रबुधयोरवस्थान्तरेणैव पापत्वम् । गुरुशुक्रयोः सर्वदा शुभफलदत्वमवगन्तव्यम् । अत्र चन्द्रस्य क्षीणत्वे पापत्वं स्वतो जायते । चन्द्रस्य क्षीणत्वेऽन्ये ग्रहाः स्थानबलादिबलवन्तोऽपि विबला भवन्ति । तत्स्मात्सर्वे ग्रहाः शुभानि न दद्युः । तेन हि क्षीणचन्द्रस्य पापत्वं क्षीणचन्द्रादप्यर्कस्य पापत्वं, तस्मादपि कुजस्य, तस्मादपि शनेः, रविकुजौ तु वह्निभूतस्य स्वरूपौ, क्षत्रकुलाधिपौ च, तथापि रवेः सत्त्वगुणमयत्वादत्यन्तं पापत्वं न विद्यते कुजस्य तमोमयत्वादर्कादिभिः पापत्वमुच्यते । शनेस्तु तमोमयत्वाद्वायुमयत्वाद्दुःखमयत्वाच्च कुजादपि पापत्वं जायते । यवनपक्षे तु रवेः क्रूरत्वं कुजशन्योः पापत्वमिति विशेष उक्तस्तथा च तद्वाक्यम्-

"क्रूरग्रहोऽर्कः कुजसूर्यजौ तु पापौ शुभाः शुक्रशशाङ्कजीवाः ॥" इति ।

अस्य प्रयोजनं तु-शुभग्रहैः पापग्रहैश्च बलयुतैःफलभेद उच्यते तथा च सारावल्याम्-

"आचारसत्त्वशुभशौर्ययुताः स्वरूपा-
स्तेजस्विनः कृतविदा द्विजदेवभक्ताः ।
स्रग्वस्त्रगन्धजलभूषणसत्प्रियाश्च
सौम्यग्रहैर्बलयुतैः पुरुषा भवन्ति ॥
लुब्धाः कुकर्मनिरता निजकार्यनष्टाः
साधुद्विषः सरलहासमनोऽभिभूताः ।
क्रूराः सदा वधरता मलिनाः कृतघ्नाः
पापग्रहैर्बलयुतैः पिशुनाः कुरूपाः ॥ " इति ।

क्षीणेन्दोरधमकथनं तस्य शुभसूचकम् " अमायां च चतुर्दश्यां क्षीणचन्द्रो न सर्वदा ॥ ५ ॥

(औपच्छन्दासिकम्)

बुधसूर्यसुतौ नपुंसकाख्यौ
शशिशुक्रौ युवती नराश्च शेषाः ।

शिखिभूखपयोमरुद्गणाना-

धिपा भूमिसुतादयः क्रमेण ॥ ६ ॥

ग्रहाणां नपुंसकस्त्रीपुरुषत्वमुच्यते । बुधसूर्यसुतौ नपुंसकौ । शशिशुक्रौ युवती । नरास्तु शेषाः । अत्र तु अर्थविशेषो ध्वन्यते । शेषाः रविकुजगुरवः पुरुषास्तेषां क्रममध्येऽर्कः पिता, कुजो भ्राता, गुरुः सुतः । शशिशुक्रौ युवती-शशी माता, शुक्रो भार्या । अत्र स्त्रीग्रहकथनानन्तरं पुंग्रहविधिस्तथापि नपुंसकोपि । स्त्रीपुंविभागे ज्ञेयः बुधस्त्रीनपुंसकं, सूर्यसुतः पुंनपुंसकम्, अर्थाद्बुधशन्योर्नपुंसकत्वविधानाः। चेष्टामात्रफलानां तिरश्चामपि सूचकत्वमूह्यम् । अथ स्त्रीपुरुषसंयोगाल्लब्धानां, तथा दत्तपुत्रादीनामपि कारकत्वं तर्कणीयम् । पुंस्त्रीनपुंसकचिन्तायां सर्वत्राऽयं विधिः । शिखीत्यादिना ग्रहाणां भूतसम्बन्ध उच्यते । शिखिभूप्रभृतीनां भूमिसुतादयोऽधिपाः स्वामिनो भवन्ति । गणशब्दः पादपूरणार्थमिति कैश्चिद्व्याख्यातं तदसत्, यतः अथ बहुलं स्वल्पं शास्त्रप्लवं प्रारभे इत्युक्तवताऽऽचार्येण न केवलं पादपूरणार्थमयं शब्दः प्रयुक्तः इति प्रतिभाति, तस्मादयमर्थोऽत्र गम्यते गणशब्दः प्रत्येकं योजनीयः । शिखिगणास्तावद्वह्निरूपचक्षुरिन्द्रियपादव्यानमनोमयकोशाः । भूगणाः पृथिवीगन्धघ्राणेन्द्रियोपस्थप्राणमयकोशाः । खगणाः ह्याकाशशब्दश्रोत्रेन्द्रियवाक्समानानन्दमयकोशाः । पयोगणाः खलु रसनेन्द्रियाद्यपानप्राणमयकोशाः मरुद्गणा वायुस्पर्शत्वगिन्द्रियपाण्युदानविज्ञानमयकोशाः । एवमुपदेशसिद्धोर्थः । मेषादिराशीनामपि स्वामिग्रहोक्तान्येव भूतानीत्यवगन्तव्यम् । राशीनां भूतानुपदेशः । तथा च कृष्णीये-

"क्षित्यम्बुपवनपावकवियन्ति भूतानि पञ्च कथितानि ।
बुधभृगुयमभौमानां जीवस्यैषां गृहाणां च ॥ " इति ।

कुलीरसिंहयोर्जलाग्नी भूते, 'वह्न्यम्बु' इत्यादिना रविचन्द्रयोः पूर्वमेव कृते, अत्र ग्रहाणां शुष्कार्द्रत्वमप्यनया भूतोक्त्यैव सिद्धमेव । कथमग्निमयत्वादर्ककुजयोर्वायुमयत्वाच्छनेस्तु शुष्कत्वमवगन्तव्यम् । जलमयत्वाच्छशिशुक्रयोरार्द्रत्वमवगन्तव्यम् । गुरुबुधयोराकाशपृथिवीमयत्वादाश्रयतुल्यत्वमवगन्तव्यम् । तथा च कृष्णीये-

"शुष्का रविकुजसौराः सितचन्द्रमसौ जलात्मकौ ज्ञेयौ ।
आश्रयगौ गुरुसौम्यौ सबलावित्युक्तमाचार्यैः ॥ "

अनेन भूतकथनेनैव ग्रहाणां राशीनां च सजलविजलात्मकत्वमवगन्तव्यम् । रविकुजमन्दा अग्निवायुमयत्वादतोयाः । शुक्रचन्द्रावाप्यत्वाज्जलमयौ । बुधगुरुक्षित्याकाशतुल्यत्वादाश्रयतुल्यौ । एवं राशीनां च । तथा च कृष्णीये-

"मीनकर्किमृगान्त्यार्द्धवृषतौल्यालियोषितः ।
कुम्भश्च तोयभानि स्युर्ग्रहेषु शशिभार्गवौ ॥
तोयात्मकौ ज्ञजीवौ तु सतोयौ जलराशिगौ ।
वितोयौ वह्निराशिस्थौ शुष्काः शन्यर्कभूमिजाः ॥ " इति ।

भूमिषु जलप्रश्ने वर्षप्रश्ने चास्य विनियोगः । पुनरप्युपदेशः प्रदर्श्यते । यत्र रविकुजौ दुःस्थौ तत्राग्नेयाः पैत्तिकाः । यत्र चन्द्रशुक्रौ दुःस्थौ तत्र जलप्रधानरोगाः । यत्र बुधो दुःस्थस्तत्र त्रिदोषप्रधानाः ।
यत्र शनिर्दुःस्थस्तत्र वातप्रधानाः । यत्र गुरुर्दुःस्थस्तत्राकाशप्रधाना बधिरत्वादयो रोगा भवन्ति । एवं भूतवशाद्बहुधा फलं चिन्त्यते । उदयादारभ्य पादोनचतुर्घटिकाकालेन पृथिव्यादिपञ्चभूतानि क्रमोत्क्रमाभ्यामुद्यन्ति । तथा चोक्तम्—

"पादाभ्यधिकमथैकं त्रिपादमर्धं च पादं च ।
भूम्यादीनामुदयघटिकामानं विदुः क्रमोत्क्रमतः ॥"

राशिभूतादयोऽपि हि निरूप्यन्ते । तथा च भगवत्पादाचार्यः—

"पुटयोरुभयोश्च दण्डसंस्था पृथिवी तोयमधः कृशानुरूर्ध्वम् ।
पवनो नसीह वामे मध्ये गगनं भूतगतिस्तनूद्भवेयम् ।" इति ।
"न मृतिर्न रोगशान्तिः पृथ्व्या उदये जलोदये च पुनः ।
ईप्सितमचिरात्सिद्ध्यति वह्नेरुदये मृतिर्विरोधश्च ॥
वायोरुदये सिद्ध्यति सर्वं गमनागमादिबलकार्यम् ।
व्याध्यारम्भो नाशो द्रव्याणामाहवश्चात्र ॥
आकाशोदयकाले सिद्ध्यत्यशुभं विशेषेण ।" इति ।

अलमतिप्रसङ्गेन ॥ ६ ॥

(उपजातिः)

विप्रादितः शुक्रगुरू कुजार्कौ
शशी बुधश्चेत्यसितोऽन्त्यजानाम् ।
चन्द्रार्कजीवा ज्ञसितौ कुजार्की
यथाक्रमं सत्त्वरजस्तमांसि ॥ ७ ॥

विप्रादयः शुक्रादयो वर्णाधिपाः शुक्रगुरू विप्राधिपौ कुजार्कौ क्षत्रियाधिपौ । शशी वैश्याधिपः । बुधः शूद्राधिपः । शनिरन्त्यजानामधिपः इति । तथाचोक्तम्—

"विप्राद्यौ गुरुसितौ नृपती कुजार्कौ ।
वैश्यः शशी शशिसुतो वृषलोऽर्कजोऽन्त्यः ।" इति ।

शशी बुधश्च वैश्याधिपौ, शनिः शूद्राधिप इति केचित्। तथा च कृष्णीये–

विप्रौ भृगुदेवगुरू क्षत्रियभावौ दिवाकरोर्वीजौ।
वैश्यौ बुधचन्द्रमसौ शनैश्चरः शूद्रसंकरकृत्॥" इति।

पक्षद्वयानुसारेण शनिर्बुधश्चेत्यसमासनिर्देशः। शुक्रगुरू इत्यत्र शुक्रो मध्यमब्राह्मणः गुरुरुत्तमब्राह्मणः। राशिग्रहसम्बन्धवशाच्छेषं कुजार्कावित्यत्रायं न्यायो द्रष्टव्यः-कुजो माण्डलिकः, रविः सार्वभौमः। सामाद्युपायचतुष्टयाधिपत्यमनेन सूचितम्। शुक्रगुर्वोर्विप्रत्वात्सामाधिपत्यमूह्यम्। कुजार्कयोःक्षत्रियत्वाद्दण्डाधिपत्यमवगन्तव्यम्। शशिनो वैश्याधिपत्यं देयमवगन्तव्यम्। बुधशन्योरन्त्यवर्णाधिपत्यत्वाद्भेदाधिपत्यं वेद्यम्। तथा च संग्रामविजये–

"साम्नो भृग्वङ्गिरसौ दण्डाधीशौ दिवाकरोर्वीजौ।
दानाधिपः शशाङ्को भेदस्य बुधार्कपुत्रौ च॥" इति।

अथ ग्रहाणां द्विपदचतुष्पदपक्षिसरीसृपत्वमप्यनेन सूचितम्। विप्रशब्देन द्विपात्प्रवरो ब्राह्मणः। द्विपदादित इति यावत्। शुक्रगुरू द्विपदौ। कुजार्कजौ चतुष्पदौ। शशी सरीसृपः। बुधासितौ पक्षिणौ इति। तथा च कृष्णीये–

"सूर्यात्मजेन्दुपुत्रौ पक्षिसमानौ सरीसृपश्चन्द्रः।
द्विपदौ भृगुदेवगुरू चतुष्पदौ भूमिपुत्रार्कौ॥" इति।

जातिनिर्णयेऽस्य विनियोगः। चन्द्रार्कजीवा इत्यादि ग्रहाणां त्रिगुणात्मकत्वमनेन विधीयते। यस्मिन्ग्रहे बलवति पुरुषो जातस्तद्ग्रहगुणस्वभावो भवति, त्रिविधा हि पुरुषा भवन्ति। सात्त्विका राजसिकास्तामसिकाश्चेति। स्वभावश्च संहितायामुक्तम्। तथा च तद्वाक्यम्–

"यः सात्त्विकस्तस्य भवेत्स्थिरत्वं सत्यार्जवे ब्राह्मणदेवभक्तिः।
रजोधिकः काव्यकलाकृतिः स्त्रीसंसक्तचित्तः पुरुषोऽतिशूरः॥
तमोधिको वञ्चयिता परेषां हिंस्रोऽलसः क्रोधपरोऽतिनिद्रः।
मिश्रैर्गुणैर्मिश्रगुणस्वभावा भवन्ति सर्वेपि शरीरभाजः॥" इति।

लग्ने ग्रहदृष्टियोगाभ्यां वा बलवद्ग्रहवशात्त्रिगुणाधिपत्यं चिन्त्यम्। अथवा यस्य त्रिंशांशके रविस्तद्गुणप्रधानः पुरुषो भवति। तथा च स्वल्पजातके–

"सत्त्वं रजस्तम इति त्रिंशांशे यस्य भास्करस्तादृक्।" इति।

देवताविशेषश्चिन्त्यः। तुङ्गग्रहयोगदृष्टिवशादनुकूलस्थाने ग्रहाणां स्थितिवशाद्विशेष ऊह्यः। पुंस्त्रीराशिग्रहवशाद्देवतापुंस्त्रीविभागः कल्प्यः तत्र चन्द्रः सात्त्विकप्रकृतिः, रविः सात्त्विकः शिवः, गुरुः सात्त्विको विष्णुः इत्यादि। जातकेषु ग्रहवशात्त्रिगुणाधिक्यं विज्ञाय पुरुषस्य शुभाशुभफलं चिन्त्यम्॥ ७॥

मधुपिंगलदृक्चतुरस्रतनुः
ज्वलनप्रकृतिः सविताऽल्पकचः ।
तनुवृत्ततनुर्बहुवातकफः
विबुधश्च शशी मृदुवाक् शुभदृक् ॥ ८ ॥

अथ ग्रहस्वभाव उच्यते । मधुपिंगला दृग् यस्य । चतुरस्रतनुश्चतुष्कोण इत्यर्थः पुनः भावफलाध्याये 'शूरस्तब्ध' इति वक्ष्यति । तदत्र योज्यम् । शूरस्तब्धः प्रधान इत्यर्थः । गम्भीरश्च पित्तप्रकृतिरित्यनेन सारावल्यामुक्तम्-

"अल्पाकुञ्चितमूर्धजः पटुमतिः सत्त्वस्वरूपश्चलो
नात्युच्चो मधुपिङ्गचारुनयनः शूरः प्रचण्डोऽस्थिरः ।
रक्तः श्यामतनुर्निगूढचरणः पित्तास्थिसारो महान्
गम्भीरश्चतुरस्रकः पृथुकरः कौसुंभवासा रविः ॥" इति ।

व्याधिप्रश्नोपयोगत्वादन्योर्थो ध्वन्यते । मधुपिंगलदृगिति नयनविकलः । अल्पकचो नष्टकचः । ज्वलनप्रकृतिः पित्तप्रकृतिः; पित्तप्रधानदाहोष्णज्वरादिमानित्यर्थः । चतुरस्रकथनेन भोजननष्टादिषु पात्रद्रव्याकृतिज्ञानं प्रयोजनम् । तनुवृत्ततनुरिति-तनुर्लघुः, वृत्तं वर्त्तुलं, विबुधः प्राज्ञः त्रिकालवित् । मृदुवाक् मधुरवचाः । शुभदृक् सुनयनः । तथा च सारावल्याम्-

सौम्यः कान्तविलोचनो मधुरवाग्गौरः कृशांगो युवा
प्रांशुः सूक्ष्मविकुञ्चितासितकचः प्राज्ञो मृदुः सात्त्विकः ।
चारुर्वातकफात्मकः प्रियसखो रक्तैकसारो घृणी
वृत्तः स्त्रीषु रतश्चलोतिसुभगश्चित्राम्बरश्चन्द्रमाः ॥" इति ॥ ८ ॥

(स्वागता)

क्रूरदृक् तरुणमूर्तिरुदारः
पैत्तिकः सुचपलः कृशमध्यः ।
श्लिष्टवाक् सततहास्यरुचिर्ज्ञः
पित्तमारुतकफप्रकृतिश्च ॥ ९ ॥

क्रूरदृग् अशुभदृष्टिः । तरुणमूर्त्तिर्युवा । उदारो दाता । पैत्तिकः पित्तप्रकृतिः । सुचपलः अस्थिरः । कृशमध्यो दुर्बलकटिः । क्रूरं पश्यतीति क्रूरदृक् । तरुणमूर्तिर्बालाकार इति केचित् । क्रूरदृगिति क्रूरा दृग् यस्येति, कुजस्य दृष्टरशुभत्वं सूचितम् । अथवा लोचनस्य रक्तत्वात्क्रूरदृक्, तरुणमूर्तिः । सुदृढवपुः, पैत्तिक इत्यंगादिदीप्तिः

सूचिता। उदारशब्देन पटुतरत्वं सूचितम्। चपलः अविमृश्यभाषी अनिष्पन्नवागित्यर्थः। तरुणशब्देन कुञ्चितकेशत्वम्। अथवा क्रूरदृगिति चण्डः विघातकुशलः संरक्षणे भीरुः कुज इति। श्लिष्टवागिति। श्लिष्टा वाग्यस्येति प्रियवागित्यर्थः। अथवा श्लिष्टा युक्ति युक्ता वाग्यस्येति। अथवा श्लिष्टा यथास्थानप्राप्ताऽक्षरा वाग्यस्येति। सततहास्यरुचिः सततं सर्वदा हास्ये हसने रुचिरस्येति, हसनशील इत्यर्थः। दुष्टात्मा वा अथवा हास्यरसरुचिः शुभा यस्येति। सर्वेषामनुकरणेन हास्यरसजनक इत्यर्थः। पितमारुतकफप्रकृतिश्चेति चशब्देन मध्यरूप इत्यपि सूचितम्। एवं बुधस्वरूपम्। तथा च सारावल्याम्—

"रक्तान्तायतलोचनो मधुरवाक् दूर्वादलश्यामल-
स्त्वक्सारोतिरजोधिकः स्फुटवचाः स्फीतस्त्रिदोषात्मकः।
हृष्टो मध्यमरूपवान् सुनिपुणो वृत्तः शिराभिस्ततः
सर्वस्यानुकरोति वेषवचनैः पालाशवासा बुधः॥ ९॥" इति।

(वंशस्थम्)

बृहत्तनुः पिङ्गलमूर्द्धजेक्षणो
बृहस्पतिः श्रेष्ठमतिः कफात्मकः।
भृगुः सुखी कान्तवपुः सुलोचनः
कफानिलात्माऽसितवक्रमूर्द्धजः॥ १०॥

श्रेष्ठमतिरिति धर्मबुद्धिः न श्रोत्रज्ञश्च क्षमावान् वेदशास्त्रज्ञश्च कफात्मक इति श्लेष्मप्रकृतिः दयापरश्च बृहस्पतिः इति स्वरूपम्। तथा च सारावल्याम्—

"ईषत्पिंगललोचनोऽश्रुतिपरः सिंहाब्दनादः स्थिरः।
सत्त्वाढ्यः सुविशुद्धकाञ्चनवपुः पीनोन्नतोरस्थलः॥
ह्रस्वो धर्मपरः सुनीतिनिपुणो बद्धोत्कटाक्षः क्षमी।
व्यापीताम्बरभृत्कफात्मकतनुर्मेधाप्रधानो गुरुः॥" इति।

भृगुः सुखीति शुक्रस्वरूपमुच्यते—शीतेन सुरभिद्रव्यैरन्नपानैश्चाम्बरैः स्त्रीभिश्च मदनोपकरणैरन्यैश्च काव्यादिभिरिष्टजनेन च सुखीत्युक्तम्। कान्तवपुरिति ललितदेहः कान्तिमान् स्त्रीणां मनोहरश्चोक्तः सुलोचनः इति विशालायतनयन उक्तः। कफात्मेति कफप्रधानवातप्रकृतिरुक्तः। असितवक्रमूर्द्धजेति तथा चोक्तम्—

"कृष्णाकुञ्चितसूक्ष्मलंबितकचः" उक्तः। एवं शुक्रस्वरूपम्। तथा च सारावल्याम्—

"चारुर्दीर्घभुजः पृथूरुवदनः शुद्धाधिकः कान्तिमान्
कृष्णाकुञ्चितजानुलंबितकुचो दूर्वाङ्कुरश्यामलः।

कामी वातकफाधिकोऽतिसुभगश्चित्राम्बरो राजसः
लालावान्मतिमान्विशालनयनः स्थूलात्मदेहः सितः ॥१०॥" इति ।

(वसंततिलका)

मन्दोऽलसः कपिलदृक्कृशदीर्घगात्रः
स्थूलद्विजः परुषरोमकचोऽनिलात्मा ।
स्नाय्वस्थ्यसृक्त्वगथ शुक्रवसा च मज्जा
मन्दार्कचन्द्रबुधशक्रसुरेज्यभौमाः ॥ ११ ॥

एवंगुणो मन्दः । अलसः मन्दोत्साहः मन्दस्वरूपमुच्यते । अलस इति परिभ्रमेण सह क्रोधपरश्चोक्तः । मन्द इति पिशुनश्चपलः अज्ञः रौद्रश्चोक्तः । कपिलदृक् कपिलनिम्नलोचनः । अथवा कपिलदृगिति कपिला कलुषिता स्थूला नखदन्तादयो यस्य अधोभागे परुषाणि रोमाणि बहूनि सन्तीति ज्ञानार्थमेवं मन्दस्वरूपमुक्तम् । तथा च सारावल्याम्-

"पिंगो निम्नविलोचनः कृशतनुर्दीर्घः सिरालोलसः
कृष्णांगः पवनात्मकोऽतिपिशुनः स्नाय्वात्मको निर्घृणः ॥
मूर्खः स्थूलनखद्विजेतिमलिनो रूक्षो शुचिस्तामसो
रौद्रः क्रोधपरो जरापरिणतः कृष्णाम्बरो भास्करिः ॥" इति ।

अत्राल्पाकुञ्चितमूर्द्धजः इत्यादिश्लोकाः इह स्वरूपप्रदर्शकाः । सारावलीगता ये मया लिखितास्तेषूक्तानि ग्रहवर्णगणधातुवस्त्राण्याचार्येणाप्युपदिष्टानि । रक्तश्याम इत्यादिना वर्णः । चन्द्रार्कजीवा इत्यादिना गुणाः स्नाय्वस्थीत्यादिना धातवः । वर्णास्ताम्रेत्यादिना वस्त्रवर्णविशेषाश्च कथिताः । अनेन ग्रहस्वरूपकथनेन प्रयोजनम् । प्रश्नजातकादौ देहस्वभावकथनम् । तथा च कृष्णीये-

"अथर्ते ग्रहा बलस्थाश्चिन्ताकाले नृणां स्वमूर्तिसमाः ।
कुर्युर्देहान्नियतं बहवस्तु समागता मिश्रम् ॥" इति ।

स्नाय्वस्थीति ग्रहाणां धातवः । बलवद्ग्रहधातुसारो जातः । रोगप्रश्ने तु दुष्टग्रहधातुगतो रोगो भवति। अथवा रोगप्रदग्रहनवांशकाधिपतिधातुरोगो भवति ॥११॥

(शार्दूलविक्रीडितम्)

देवाम्ब्वग्निविहारकोशशयनक्षित्युत्करेशाः क्रमाद्
वस्त्रं स्थूलमभुक्तमग्निकहतं मध्यं दृढं स्फाटितम्।

ताम्रं स्यान्मणिहेमयुक्तिरजतान्यर्काच्च मुक्तायसी
द्रेष्काणैः शिशिरादयः शशुरुचज्ञगवादिषूद्यत्सु वा ॥ १२ ॥

अर्कादारभ्य ग्रहाणां स्थानानि। देवशब्देन देवगृहं राजगृहं च सूच्यते। क्षित्युत्करः पांसूत्कर उपस्करो वोक्तः। यत्र सर्वादीनां नष्टादीनां स्थानजिज्ञासा तत्र गृहवशात्स्थानकथनेयं विधिः। देवाम्बादेः समीपं वासगृहं वा स्वरूपं वा योग्यमूलम् वस्त्रं स्थूलमित्यादि स्थूलं परुषमभुक्तमननुभूतम्। नवमाच्छिन्नमाग्निहतं दग्धं छिन्नं वाऽरक्षितत्वात् कहतं मलिनं छिन्नं वा। तथा च कृष्णीये—

"मलिनच्छिन्नदृढादृढदग्धस्थूलाम्बुधातुजीर्णानि।
सौम्येन्दुगुरुभुजङ्गमकुजार्कशिखिभृगुसूर्यजानां स्युः॥" इति।

स्थूलशब्देन चर्म च सूचितम्। अभुक्तशब्देनाक्षालितदुकूलं वस्त्रादयो गृह्यन्ते। अग्निकहतमग्निगतं 'हन हिंसागत्योः' इति गत्यर्थस्य निष्क्रान्तरूपं हतमित्युच्यते। काष्ठादग्निर्जायते। कारणकार्याभेदोपचाराद्वृक्षत्वमित्यर्थः। कहतं जलवन्मृदु प्रवालजलसम्बन्धे हिंसितमिति वा। मध्यं कौशेयं, दृढं प्रसिद्धम्। कार्पासकृतमम्बरम्, स्फाटितं—वल्कलमित्यर्थान्तरं सूचितम्। तथा च कृष्णीये—

"वल्कलमर्ककुजाभ्यां गुरुणा कौशेयमिन्दुजे बालम्।
शशिना च दुकूलपदं रविणा चर्माम्बरं भृगुणा॥" इति।

ताम्रं स्यादित्यादिताम्रशब्देन पाटलवर्णं पाषाणाद्यं च गृह्यते। अन्यानि द्रव्याणि च रवेस्तावत्सूर्यकान्त आरकूटं वैदूर्यश्च गृह्यते। चन्द्रस्य जलस्वरूपत्वान्मुक्ताशङ्खस्फटिककांस्यत्रपूणि। ताम्रेष्टकादि भौमस्य। मुक्तकादि बुधस्य। रजतस्फटिकमुक्तादि शुक्रस्य। आरक्तमणिकनककाचादि बलवतो बृहस्पतेः। अञ्जनलोहेन्द्रनीलादि शनेरित्यादि। सामान्यबलस्थस्य बृहस्पतेः रजतं शास्त्रान्तरादवगन्तव्यम्। आग्नेयग्रहयोः सूर्यभौमयोर्वर्गे भौमवीक्षितं चेद्धाम्यो धातुः। जलस्वरूपयोश्चन्द्रशुक्रयोर्वर्गे चन्द्रशुक्रावीक्षितौ—चेद्धाम्योधातुरित्यनुक्तमपि पञ्चभूतग्रहयोरभेदत्वाद्बूह्यम्। 'छाया महाभूतकृताश्च सर्वेऽभिव्यञ्जयन्ति स्वदशामवाप्य' इत्युक्तत्वाद्वर्णास्ताम्रेत्यादिधातुना वर्णाश्चिन्त्याः। द्रेष्काणैः शिशिरादय इति शनिशुक्ररुधिरचन्द्रज्ञगुरुभिराद्यक्षरोक्तैः रवेः शिशिरादि षडृतवो ज्ञेयास्तेषां द्रेष्काणे वा तेषामुदयाद्वेत्यर्थः॥ एतदृतुषु ग्रहानुगुणो गणैरप्युन्नेयं शीतं हिमाधिक्यात्तद्दतौ मन्दस्य दुःखकारकत्वेन दुःखकालः। शुक्रस्य मदनस्वरूपत्वात्तद्दतौ मदनोदयः। रुधिरस्याग्नेयत्वात्तद्दतौ तैक्ष्ण्यम्। चन्द्रस्य जलमयत्वात्तद्दतौ वर्षागमः। ज्ञस्य वैमल्यात्तद्दतौ वैमल्यम्। गुरोः ज्ञानस्वरूपत्वात्तद्दतौ बुद्धेःसात्त्विकमित्यादि। यो ग्रहो व्याधिप्रश्ने दुःस्थस्तद्दतौ तद्रोगविकारः। इति॥ १२॥

(प्रहर्षिणी)

त्रिदशत्रिकोणचतुरस्रसप्तमा-
न्यवलोकयन्ति चरणाभिवृद्धितः।
रविजामरेज्यरुधिराः परे च ये
क्रमशो भवन्ति किल वीक्षणेऽधिकाः॥ १३॥

चतुरस्रमध्यमा परे च ते चरणाभिवृद्धित अवलोकयन्ति ग्रहा इति सिद्धं भवति। तत्रायं विशेषः। रविजामरेज्यरुधिराः ये परे च तेः वीक्षणेऽधिकाः। त्रिदशत्रिकोणयोश्चतुरस्रयोः सप्तमे च वीक्षणेऽधिकाः फलप्रदाः भवन्ति। समग्रफलदा भवन्तीत्यर्थः। अत्र न केवलं सप्तमे दृष्टे विनियोगः। अन्यस्थानामपि पादार्धपादोनदृष्टीनामपि जन्मकाले निरूपणीयत्वमश्यमेव। तथा च सारावल्याम्-

"वृषे शशी लग्नगतः सुपूर्णो बुधोऽपि पातालगतो यदि स्यात्।
तदास्य जातो भवति क्षितीशः-॥" इति।

अस्य योगस्य वृषस्थस्य शशिनः सुपूर्णत्वे सूर्यस्य वृश्चिकस्थितिरेव संगच्छते। ततो बुधस्य सिंहस्थितिर्न घटते। इत्यसम्भाव्यत्वं विद्यते। इति चेदस्तु पूर्वशास्त्रानुसारेण कृतोऽयं योगः। दृष्टिप्रामाण्याय पुनरपि योगान्तरमस्ति। तथा हि तत्रैव सारावल्याम्-

"एकः स्वोच्चेशुभःस्याच्छुभगगनगः संस्थितो निर्मलांशुः
केन्द्रे भानुः प्रकटितबलः केवलं पूर्णवीर्यः।
दृष्टः कुर्यादमरगुरुणा पञ्चमस्थेन जातं
भूमेर्नाथं बहुगजयुतं सर्ववन्द्यं कृतार्थम्॥" इति।

किल शब्देन ग्रहदृष्टेरनिश्चितत्वं सूचितम्-सर्वप्रश्नजातकनिरूपणेऽवश्यं विचार्यत्वं सूचितम्। पञ्चसप्तदशकिरणा मन्दगतिचन्द्रभार्गवशशिसुतरविभौमजीवानामिति ग्रहाणामुक्तम्। रश्मिविधौ पक्षान्तरमस्ति। विंशतिरष्टादशमनुषोडशकदशककिरणाः स्युः सूर्यादीनां ज्ञेया इति। त्रिदशत्रिकोणचतुरस्रसप्तमान्सर्वे ग्रहाश्चरणाभिवृद्धितः अवलोकयन्ति। ग्रहस्य स्वस्थानात्तृतीये भावारम्भे पाददृष्टिः तस्माद्वृद्धिं प्राप्य तृतीयचतुर्थभावसन्धौ पादोनदृष्टिः पूरिता भवति। पुनः ह्रासं प्राप्य चतुर्थपञ्चमसन्धौ अर्द्धदृष्टिर्जायते सा च ह्रासं प्राप्य पंचमषष्ठभावसन्धौ शून्या भवति। षष्ठारभ्य सप्तमभावसन्धौ पूर्णा भवति। पुनस्तस्मादारभ्य ह्रासेन सप्तमाष्टमभावसन्धौ पादोना जायते। तस्मादपि ह्रासेन नवमादावर्द्धदृष्टिर्जायते। तस्मादपि नवमदशमादौ तथा पाददृष्टिर्जायते। श्लोकपूर्वार्द्धस्यैषाभिप्रायः। अपरार्द्धस्य च तु रविजामरेज्यरुधिराः परे च क्रमशः वीक्षणेधिका-

स्तृतीयदशमयोः रविजोऽधिकस्त्रिकोणयोर्गुरुराधिकश्चतुरस्रयो रुधिरोऽधिक इत्यस्यायमभिप्रायः तृतीयदशमयोः रविजस्य दृष्टिराधिका स्यात्तृतीये तु भावादौ पूर्णदृष्टिः । भावान्ते ह्रासेन पादोना जायते । दशमे तु भावादौ षष्टिरन्त्ये शून्या दृष्टिर्भवति गुरोस्तु पञ्चमादौ तु पूर्णा दृष्टिरन्त्ये शून्या । नवमे तु भावादौ पूर्णा । भावह्रासवशात्पाददृष्टिर्भवति । रुधिरस्य चतुर्थे भावादौ पूर्णा दृष्टिः पुनर्ह्रासेन भावान्तेऽर्द्धदृष्टिर्भवति अष्टमे तु भावादौ पूर्णदृष्टिर्भूत्वा चतुर्थदृष्टिवद्ध्रासेन नवमेऽर्द्धा भवति । उपरितनभावदृष्ट्यनुगुणेन दृष्टेर्ह्रासवृद्धी कल्प्याविति । अत्र द्वादशैकादशलग्नेषु वराहमिहिराचार्येण ग्रहदृष्टिर्नोक्ता तेष्वप्यस्तीति केचिद्वदन्ति । तथा च यवनेश्वरः–

"पादार्द्धश्च तदर्द्धश्च पूर्णमाये व्यये तनौ ॥ " इति ।

अत्र लग्ने ग्रहस्थितभावसमांशके पूर्णदृष्टिः । व्यये षोडशांशदृष्टिरेकादशेऽष्टमांशदृष्टिर्व्ययायलग्नेषु ग्रहदृष्टिः श्रीपतिना–विना कृताधिकं पश्यति न ग्रहेन्द्र इत्युक्त्वात्तथा दृष्ट्यानयनक्रियां पराशरमुनिराह–

"दृश्याद्विशोध्य द्रष्टारं षड्राशिभ्योऽधिके भजेत् ।
दृग्भ्यो विशोध्य द्वाभ्यां तु भागीकृत्य च दृष्टयः ॥
शराधिके विना राशिं भागाद्विघ्नाश्च दृष्टयः ।
वेदाधिके त्यजेद्धृत्वा भागा दृष्टिस्त्रिभाधिके ॥
विशोद्ध्यार्णवतो द्वाभ्यां लब्धा त्रिंशद्युता भवेत् ।
कराधिके विना राशिं भागाश्च तिथिसंयुताः ॥ *
करादूने विना राशिं भागा द्वाभ्यां विभाजिताः ।
त्रिदशे च त्रिकोणे तु तुर्याब्दे च क्रमादिह ॥
शरवेदाः खरामाश्च तिथयो योजिताः क्रमात् ।
शनिदेवेज्यभूजानां क्रमादादौ भवन्ति हि ॥ " इति ।

अत्रापि स्पष्टतरः श्रीधरपद्धत्यामुक्तो दृष्ट्यानयनप्रकारः सोऽत्रोच्यते ॥

"दृश्याद्विशोध्य द्रष्टारं ग्रहं भावादथापि वा ।
रूपात्त्यक्ताः करघ्नाः स्युर्भागा रूपाधिके सति ॥
विना राशिं करात्तं द्वौ राशी चेत्तिथिसंख्यकाः ।
कराधिके विना राशिं भागास्तिथियुताः क्रमात् ॥
विनार्किमार्कैः षष्टिः सागरसंख्येऽधिके करौ ।
हित्वा विभक्तिर्हीना सा षष्टिदृष्टिर्भवेदथ ॥
त्रिराशयश्चेत्तद्भागा भक्ता द्वाभ्यां च दृष्टयः ।
राशित्रयाधिक राशिं भागीकृत्य कलीकृताव ॥

भागार्द्धं वर्जयेद्भौमं विना तस्याधिके सति ।
षष्टिस्तदधिकेंशाश्च वर्जयेत्षष्टितो भवेत् ॥
वेदसंख्ये गुरोः षष्टिरन्येषां त्रिंशदेव च ।
वेदाधिक्ये त्यजेद्भूतादन्येषामंशकाद्गुरोः ॥
द्विघ्नाश्च राशेर्नास्त्येव दृष्टिः पञ्चाधिके तथा ।
राशिं विनांशा द्विघ्नाः स्युः षट्के षष्टिर्दृशः स्मृताः ॥
दिग्भ्यस्तदधिके शोद्ध्या द्वाभ्यां लब्धाश्च दृष्टयः ।
भौमस्य सप्त चेत् षष्टिरधिके भागवर्जिताः ॥
अष्टौ यदा गुरोः षष्टिरधिकेंशास्त्रिसंगुणाः ।
द्वाभ्यां लब्धोनिताः षष्टिः शनेः षष्टिः शुभाः स्मृताः ॥
अधिकेंशाः करघ्नाः स्युः शोध्या दृष्टिश्च षष्टिके ।
त्रिंशांशयोः द्रूरगतं० .... ॥
राशीनां दशके न स्याच्चक्रात्तदधिके सति ।
विशोद्ध्याद्वि विभक्ताश्च भागा नव च दृष्टयः ॥
एकादशाधिके चक्राद्विशोद्ध्याष्टविभाजितम् । " इति ।

अत्र त्रिदशादिस्थानेषु ग्रहाणां या दृष्टिरुदिता सा दृष्टिर्मुहूर्त्तादौ न गृह्यते । तत्र सप्तमदृष्टिरेव गृह्यते । अत्र निरूपितया ग्रहदृष्ट्या कालान्तरेण नष्टादिद्रव्यनिर्णयः क्रियते । "ग्रहदृष्टिसमानरश्मिसंख्यातुल्यादिद्रव्यसंख्येति । रश्मिसंख्याः शास्त्रान्तरादवगन्तव्याः । तथा च कृष्णीये-

"चतुरेकविंशषोडशदशसंख्याः पंचसप्तदशकिरणाः ।
मन्दगतिचन्द्रभार्गवशशिसुतरविभौमानाम ॥ " इति ।
"लग्नात्पुत्रकलत्रभे शुभपतिप्राप्तेऽथवालोकिते
चन्द्राद्वा यदि सम्पदस्ति हि तयोर्ज्ञेयोऽन्ययमसंभवः ॥ "

इत्यत्र दृष्ट्यानयनं कर्तव्यम्-'दृष्ट्या समानं प्रवदेच्च संख्याम्' इत्यत्रापि दृष्टिसंख्या नेतव्या । अत्रोक्तानां रश्मीनां ग्रहाणां चारवशादधिककिरणाः स्युरूनाधिकत्वमस्ति । मित्रगृहे पादसंख्या स्वगृहे च पादोनसंख्या । उच्चे सम्पूर्णसंख्या । त्रिकोणेऽर्द्धसंख्या रश्मयः । नीचराशौ विफलाः । शत्रुक्षेत्रे स्वल्पफला । ग्रहनिहत ग्रहतिरस्कृता, ग्रहापसव्यगताश्चाफलाः । तथा च कृष्णीये-

"मित्रस्वोच्चर्क्षगताः त्रिकोणसहिता ग्रहाः फलं दद्युः ।
पादं पादोनसंपूर्णं फलं तथार्द्धं च ॥